ग्रामण्योव्रतपतेव्रतेनादधामीतिवैश्यस्य । ऋभूणांत्वादेवानांव्रतपतेव्रतेनाद
धामीतिरथकारस्य । यथादेवतमग्निराधीयते । नदेवताभ्यआवृश्च्यतेवसी
यान्भवति ॥ १ ॥ उद्धन्यमानमस्याअमेध्यम् । अपपाप्मानंयजमानस्यहंतु ।
शिवानः संतुप्रदिशश्चतस्रः । शन्नोमातापृथिवीतोकसाता । शंन्नोदेवीरभिष्टये ।
आपोभवंतुपीतये । शंयोरभिस्रवंतुनः । वैश्वानरस्यरूपं । पृथिव्यांपरिस्रसा ।

नवैतत्रप्रमीयतेगौरश्वः पुरुषः पशुः । यत्रेदंब्रह्मक्रियतेपरिधिर्जीवनायकव्यपंनः शोशुंचदघम् । अपंनः शोशुंचदघमघंचत्वारिंच । मातारुद्राणांदुहिता वसूनाꣳस्वसादित्यानाममृतस्यनाभिः । प्रणुवोचंचिकितुषेजनायमागामनां गामदितिंवधिष्ट । पिबतूदकंतृणान्यत्तु । ओमुत्सृजत ॥ इति आरण्यके मंत्रसग्रहः समाप्तः ॥

॥ ब्राह्मणप्रथमाष्टके मंत्रसंग्रहप्रारंभः ॥

हरिः ॐ ब्रह्मसंधत्तंतन्मेजिन्वतम् । क्षत्रꣳसंधत्तंतन्मेजिन्वतम् । इषꣳसंधत्तंतां मेजिन्वतम् । ऊर्जꣳसंधत्तंतांमेजिन्वतम् । रयिꣳसंधत्तंतांमेजिन्वतम् । पुष्टिꣳ संधत्तं तांमेजिन्वतम् । प्रजाꣳसंधत्तंतांमेजिन्वतम् । पशून्संधत्तंतांमेजिन्वतम् ।

स्तुतासिजनंधाः । देवास्त्वांशुक्रपाः प्रणंयंतु ॥ १ ॥ भृगूणांत्वांगिरसां
व्रतपतेव्रतेनादंधामीतिभृग्वंगिरसामादंध्यात् । आदित्यानांत्वादेवानांव्रते
नादंधामीत्युन्यासांब्राह्मणीनांप्रजानांम् । वरुणस्यत्वाराज्ञोंव्रतपतेव्रतेनादंधा
मीतिराज्ञः । इंद्रस्यत्वेन्द्रियेणंव्रतपतेव्रतेनादंधामीतिराजन्यंस्य । मनोंस्त्वा
ग्रामण्योंव्रतपतेव्रतेनादंधामीतिवैश्यंस्य । ऋभूणांत्वांदेवानांव्रतपतेव्रतेनादं
धामीतिरथकारस्यं । यथादेवतमग्निराधीयते । नदेवताभ्युआवृंश्च्यतेवसीं
यान्भवति ॥ १ ॥ उद्धन्यमांनमुस्याअंमेध्यम् । अपंपाप्मानंयजंमानस्यहंतु ।
शिवानः संतुप्रदिशश्चतंस्रः । शन्नोंमाताप्टथिवीतोकंसाता । शन्नोंदेवीरभिष्टंये ।
आपोंभवंतुपीतयें । शंयोरभिस्रंवंतुनः । वैश्वानरस्यंरूपं । पृथिव्यांपरिस्रसा ।

स्योनमाविशंतुनः ॥ १ ॥ नयंप्रजांमेगोपाय । अमृतत्वायंजीवसेंजातांजनि
ष्यमांणांच । अमृतेंसुत्येप्रतिष्ठितां । अथर्वापितुंमेंगोपाय । रसमन्नमिहायुंषे ।
अदंब्धायोशीततनो । अविषन्नः पितुंकृंणु । श२ स्यंपुशून्मेंगोपाय । द्विपा
दोयेचतुंष्पदः ॥ १ ॥ अष्टाशंफाः श्चयइहाग्नें । येचैकंशफाआशुगाः । सप्र
थासभांमेंगोपाय । येचसभ्यांः सभासदः । तानिंद्रियावंतः कुरु । सर्वमायु
रुपांसतां । अहेंबुध्नियमंत्रंमेगोपाय । यमषंयस्त्रायिविदाविदुः । ऋचुः सामां
नियजूं२षि । साहिश्रीरमृतांसुतां ॥ १ ॥ चतुः शिखंडायुवतिः सुपेशाः ।
घतप्रंतीकाभुवंनस्यमध्ये । मुर्मृज्यमांनामहतेसौभंगाय । मह्यंधुक्ष्वयजमाना
यकामांन् । इहैवसंतत्रंसतोवोंअग्नयः । प्राणेनंवाचामनंसाबिभर्मि । तिरोमा

संतमायुमाँप्रहासीत् । ज्योतिषावोवैश्वानरेणोपातिष्ठे । पंचधाग्नीन्व्यंक्रामत् ।
विराट्सृष्टाप्रजापतेः । ऊर्ध्वारोहद्रोहिणी । योनिरग्नेः प्रतिष्ठितिः ॥ १ ॥ संतं
तिर्वाएतेग्रहाः । यत्परःसामानः । विषूवांदिवाकीर्त्यँम् । यथाशालायैपक्षंसी ।
एव ँ संवत्सरस्यपक्षंसी । यदेतेनगृह्येरंन् । विषूचीसंवत्सरस्यपक्षंसीव्यव
स्त्र ँ सेयातां । आर्तिमाच्छैंयुः । यदेतेगृह्यंते । यथाशालायैपक्षंसीमध्य
मंवु ँ शमभिसंमायच्छांति ॥ १ ॥ एव ँ संवत्सरस्यपक्षंसीदिवाकीर्त्यंमभि
संतंन्वान्ति । नार्तिमाछैंति । एकविँशमहंर्भवति । शुक्राग्राग्रहांगृह्यंते । प्रत्युत्तं
ब्ध्यैसयुत्वायं । सौर्यंएतदहः पशुरालंभ्यते । सौर्यातिग्राह्योगृह्यते । अहंरेवरू
पेणसमंर्द्धयंति । अथोअन्हंएवैषबलिह्रियंते । सप्तैतदहंरतिग्राह्यांगृह्यंते ।

सप्तवैशीर्षण्याः प्राणाः । असावादित्यःशिरःप्रजानांम् ।शीर्षन्नेवप्रजानांप्राणां
दधाति । तस्मात्सप्तशीर्षन्प्राणाः । इंद्रोवृत्र ँ हत्वा । असुरान्पराभाव्यं ।
सइमान्लोकानुभ्यंजयत् । तस्यासौलोकोनाभिजितआसीत् । तंविश्वकर्मा
भूत्वाभ्यंजयत् । यद्वैश्वकर्मणोगृह्यते ॥ ३ ॥ सुवर्गस्यलोकस्याभिजित्यै ।
प्रवाएतेस्माल्लोकाच्चयवंते । येवैश्वकर्मणंगृह्णते । आदित्यश्चोगृह्यते । इयंवा
अदितिः । अस्यामेवप्रतितिष्ठन्ति । अन्योन्योगृह्यते । विश्वान्येवानु कर्मा
णिकुर्वाणायन्ति । अस्यामन्यनेप्रतितिष्ठंति । तावापराधात्संवत्सरस्यान्यो
न्योगृह्येते । तावुभौसहमहाव्रतेगृह्येते । यज्ञस्यैवांतंगत्वा । उभयोर्लोकयोः
प्रतितिष्ठंति । अक्थ्यमुक्थंभवति । अन्नाद्यस्यावरुध्यै ॥ ४॥ तस्माद्वाजपेय

याजीपूतोमेध्योदाक्षिण्यः । प्राङ्द्रवतिसोमग्रहैः । अमुमेवतैर्लोकमभिज
यति । प्रत्यङ्सुराग्रहैः । इममेवतैर्लोकमभिजयति । प्रतिष्ठंतिसोमग्रहैः ।
यावद्देवसत्यम् । तेनसूयते । वाजसृद्भ्यः सुराग्रहान्हरंति । अनृतेनैवविशꣳ
स ꣳ सृजति । हिरण्यपात्रंमधोः पूर्णंददाति । मधव्योसानीति । एकधाब्रह्म
णउपहरति । एकधैवयजमानआयुस्तेजोदधाति ॥ १ ॥ इंद्रोवृत्रꣳ हत्वा ।
असुरान्पराभाव्यं ॥ सोमावास्यांप्रत्यागच्छत् । तेपितरः पूर्वेद्युरागच्छन् ।
पितॄन्यज्ञोगच्छत् । तंदेवाः पुनरयाचंत । तमेभ्योनपुनरददुः । तेब्रुवन्वरं
वृणामहै।अथवः पुनर्दास्यामः।अस्मभ्यमेवपूर्वेद्युः क्रियाताइति॥ १॥ तमेभ्यः
पुनरददुः । तस्मात्पितृभ्यः पूर्वेद्युः क्रियते । यत्पितृभ्यः पूर्वेद्युः करोति । पितृ

मंत्र- भ्यंएवतद्यज्ञंनिष्क्रीयंयजंमानः प्रतंनुते।सोमांयपितृपीताय स्वधानमइत्यांह। संग्रहः
॥१०४॥ पितृरेवाधिसोमपीथमवंरुन्धे । नहिपिताप्रमीयंमाणआहैषसौमपीथइति
इंद्रियंवैसोमपीथः। इंद्रियमेवसोमपीथमवंरुन्धे। तेनेन्द्रियेणंद्वितीयांजायाम
भ्यंश्नुते ॥ २ ॥ एतद्वैब्राह्मणंपुरावाजश्रवसाविदामंक्रन् । तस्मात्तेद्वेद्वेंजाये
अभ्यांक्षता। यएवंवेदं। अभिद्वितीयांजायामंश्नुते। अग्नयेंकव्यवाहंनायस्व
धानमइत्यांह । यएवापिं तृणामग्निः । तंप्रीणाति। तिस्रआहुंतीर्जुहोति । त्रीणिं
दंधाति। षट्संपंद्यंते ॥ १ ॥ षड्वाऋतवंः। ऋतूनेवप्रीणाति। तूष्णीमेक्षंण
मादंधाति। अस्तिवाहिषष्ठऋतुर्नवां। देवान्वैपितृन्प्रीतान्। मनुष्यांः पितरो
नुप्रपिंपते। तिस्रंआहुंतीर्जुंहोति । त्रीणिंदंधाति । षट्संपंद्यंते । षड्वाऋ ॥१०४॥

तंवः ॥ ४ ॥ ऋतवः खलुवैदेवाः पितरंः । ऋतूनेवदेवान्पितॄन्प्रीणाति । तान्प्री
तान् । मनुष्यांः पितरोनुप्रापिपंते । सकृदाच्छिन्नंबर्हिर्भवति । सकृतान्ने
वप्रींणाति । दिवाहिपितरंः । त्रिर्निदंधाति । तृतीये वाइतोलोके पितरंः ।
पराङावर्तते ॥ ५ ॥ ह्नीकाहिपितरंः । ओष्मणोव्यावृतउपांस्ते । ऊष्म
भांगाहिपितरंः । ब्रह्मवादिनोंवदंति । प्राश्यां ३ नप्राश्या ३ मिति ।
यत्प्रांश्नीयात् । जन्युमन्नंमद्यात् । प्रमायुंकःस्यात् । यन्नप्रांश्नीयात् । अहं
विःस्यात् ॥ ६ ॥ पितृभ्युआवृंश्च्येत । अवघ्रेयमेव । तन्नेवप्राशितंनेवाप्राशितं ।
वीरंवावैपितरंः प्रयंतोहरंति । वीरंवांददाति । दशांछिनत्ति । हरंणभागाहिपि
तरंः । पितॄनेवनिरवंदयते । उत्तरआयुंषिलोमंछिन्दीत । पितृणांह्येतर्हिने

दीयः ॥ ७ ॥ नमस्करोति । नमस्करोहिपितॄणाम् । नमोवः पितरोरसाय ।
नमोवः पितरः शुष्माय । नमोवः पितरोजीवाय । नमोवः पितरः स्वधायै ।
नमोवः पितरोमन्यवे । नमोवः पितरोघोराय । पितरोनमोवः । यएतस्मिन्लो
केस्थ ॥ ८॥ युष्माꣳस्तेनु । येस्मिन्लोके । मांतेनु । यएतस्मिन्लोकेस्थ । यूयं
तेषांवसिष्ठाभयास्त । येस्मिन्लोके । अहंतेषांवसिष्ठोभूयासमित्याह । वसिष्ठः
समानानांभवति । यएवंविद्वान्पितृभ्यः करोति । एषवैमनुष्याणांयज्ञः ॥ ९॥
देवानांवाइतरेयज्ञाः । तेनवाएतात्पितृलोकेचरति । यत्पितृभ्यः करोति । सईं
श्वरः प्रमेतोः । प्राजापत्ययर्चापुनरैति । यज्ञोवैप्रजापतिः । यज्ञेनैवसहपुनरैति ।
नप्रमायुकोभवति । पितृलोकेवाएतद्यजमानश्चरति । यत्पितृभ्यः करोति ।

सईश्वरआर्तिमार्तोः । प्रजापतिस्त्वावैनंततउन्नेतुमर्हतीत्याहुः । यत्प्राजापत्य
यर्चापुनरैति । प्रजापतिरेवैनंततउन्नयति । नार्तिमार्च्छतियजमानः ॥ १० ॥
इत्यंश्रुतेपद्यंतेपद्यंतेषड्वाऋतवोवर्ततेहविःस्यान्नेदीयस्थयज्ञोयजमानश्चरतिय
त्पितृभ्यः करोतिपंचंच ॥ १ ॥ भागधेयेनैवैनंप्रणयति । ब्राह्मणआर्षेयउद्ध
रेत् । ब्राह्मणोवैसर्वादेवताः । सर्वाभिरेवैनंदेवताभिरुद्धरति । अग्निहोत्रमुपसा
द्यातमितोरासीत । व्रतमेवहुतमनुम्रियते । अन्तंवाएषआत्मनोगच्छति । य
स्ताम्यति । अंतमेषयज्ञस्यगच्छति । यस्याग्निमनुद्धृतꣳसूर्योभिनिम्रोचति ॥ १ ॥
पवमानः सुवर्जनः पवित्रेणविचर्षणिः । यः पोतासपुनातुमा । पुनंतुमादेवज
नाः । पुनंतुमनवोधिया । पुनंतुविश्वआयवः । जातवेदः पवित्रवत् । पवित्रेण

पुनाहिमा । शुक्रेणदेवदीद्यत् । अग्नेक्रत्वाक्रतूँ रनुं ॥ १ ॥ यत्तेपवित्रमर्चिषि
अग्नेविततमंतरा । ब्रह्मतेनंपुनीमहे । उभाभ्यांदेवसवितः । पवित्रेणसवेनंच ।
इदंब्रह्मंपुनीमहे । वैश्वदेवीपुंनतीदेव्यागांत् । यस्यैबह्वीस्तनुवोवीतपृष्ठाः ।
तयामदंतः सधमाद्येषु । वयँ स्यांमपतयोरयीणां ॥ २ ॥ वैश्वानरोरश्मि
भिर्मापुनातु । वातः प्राणेनेषिरोमयोभूः । द्यावांपृथिवीपयंसापयोभिः । ऋता
वरीयज्ञियेमापुनीतां बृहद्भिः सवितस्तृभिः । वर्षिष्ठैर्देवमन्मांभिः । अग्नेदक्षैःपुना
हिमा । येनदेवा अपुंनत । येनापोदिव्यंकशः । तेनदिव्येनब्रह्मणा ॥ ३ ॥ इदं
ब्रह्मंपुनीमहे । यःपांवमानीरध्येति । ऋषिभिः संभृतँरसं । सर्वँ सपूतमंश्ना
ति । स्वदितंमातरिश्वंना । पावमानीर्योअध्येति । ऋषिभिःसंभृतँरसं । तस्मै

सरंस्वतीदुहे । क्षीरꣳ सर्पिर्मधूदकं । पावमानीः स्वस्त्ययंनीः ॥४॥ सुदुघाहि
पयंस्वतीः । ऋषिभिः संभृतोरसः । ब्राह्मणेष्वमृतꣳहितं । पावमानीर्दिशंतुनः ।
इमंलोकमथोअमुं । कामान्त्समर्धयंतुनः । देवीर्देवैः समाभृताः । पावमानीः
स्वत्ययंनीः । सुदुघाहिघृतश्चुतः । ऋषिभिः संभंतोरसः ॥ ५ ॥ ब्राह्मणेष्वम
तं ꣳ हितं । येनंदेवाः पवित्रेण । आत्मानंपुनतेसदा । तेनंसहस्रंधारेण । पाव
मान्यःपुंनंतुमा । प्राजापत्यंपवित्रम् । शतोद्यांम ꣳ हिरण्मयं । तेनंब्रह्मविदोवयं ।
पूतंब्रह्मंपुनीमहे । इन्द्रः सुनीतीसहमांपुनातु । सोमः स्वस्त्यावरुणः समी
च्यां । यमोराजांप्रमृणाभिः पुनातुमा । जातवेदामोर्जयंत्यापुनातु ॥ ६ ॥
अनुरयीणांब्रह्मंणास्वस्त्ययंनीः सुदुघाहिघृतश्चुतऋषिभिः संभृतोरसः पुनातु

त्रीणिंच ॥ १ ॥ यत्पुण्यंनक्षत्रं । तद्बट्कुर्वीतोपव्युषं । यदावैसूर्यउदेति । अथ
नक्षत्रन्नैति । यावंतितत्रसूर्योगच्छेत् । यत्रंजघन्यंपश्येत् । तावंतिकुर्वीतयत्का
रीस्यात् । पुण्याहएवकुंरुते । एव २ हवैयज्ञेषुंचशतद्युम्नंचमात्स्योनिरवसा
यर्यांचकार । तच्छ्रोणा ॥१॥ यदशृंणोत् । तच्छ्रविष्ठाः । यच्छतमभिषज्यन् ।
तच्छतभिषक् । प्रोष्ठपदेषूदंयच्छंत । रेवत्यांमरवन्त । अश्वयुजोरयुंजत ।
अपभरंणीष्वपावहन् । तानिवाएतानियमनक्षत्राणि । यान्येवदेवनक्षत्राणि ।
तेषुकुर्वीतयत्कारीस्यात् । पुण्याहएवकुंरुते ॥ १ ॥ प्रजायते । यएवंविद्वान्लो
हितायसेनंनिवर्तयंते । एतदेवरूपंकृत्वानिवर्तयते । सततः श्वश्वोभूयान्भवं
न्नेति । प्रैवजायते । त्रेण्याशलल्यानिवर्तयेत । त्रीणित्रीणिवैदेवानांमृद्धानि ।

त्रीणिछंदां ँ सि । त्रीणिसवंनानि । त्रयंइमेलोकाः । ऋध्यामेवतद्वीर्यंएषु लोकेषुप्रतितिष्ठति ॥ १ ॥ (उपांशुः) आयुंषः प्राण ँ संतंनु । प्राणादंपान ँ संतंनु । अपानाद्व्यान ँ सतनु । व्यानाच्चक्षुः संतंनु । चक्षुंषः श्रोत्र ँ सं तंनु । श्रोत्रान्मनः संतंनु । मनंसोवाच ँ संतंनु । वाचआत्मान ँ संतंनु । आत्मनंः पृथिवी ँ संतंनु । पृथिव्याअंतरिक्ष ँ संतंनु । अंतरिक्षाद्दिव ँ सं तंनु । दिवः सुवः सतंनु ॥ १ ॥ पृथिव्याअंतरिक्ष ँ संतंनुद्धेचं ॥१॥ (उच्चैः) इंद्रोदधीचोअस्थभिः । वृत्राण्यप्रतिष्कुतः । जघानंनवतीर्नवं । इच्छन्नश्वंस्य यच्छिरंः । पर्वतेष्वपांश्रितं । तद्विदच्छर्यणावंति । अत्राहगोरमंन्वत । नामत्व ष्टुरपीच्यंम् । इत्थाचंद्रमंसोगृहे । इंद्रमिद्गाथिनोंबृहत् ॥ १ ॥ इंद्रमुर्केभिरर्किणः ।

॥१०८॥ इंद्रंवाणीरनूषत । इंद्रइद्धर्योः सचा । संमिश्लआवंचोयुजा । इंद्रोवज्रीहिरण्य
यः । इंद्रोदीर्घायचक्षसे । आसूर्यं रोहयद्दिवि । विगोभिरद्रिमैरयत् । इंद्र
वाजेषुनोअव । सहस्रप्रधनेषुच ॥ २ ॥ उग्रउग्राभिरूतिभिः । तमिंद्रंवाजया
मसि । महेवृत्रायहंतवे । सवृषांवृषभोभुवत् । इंद्रः सदामनेकृतः । ओजिष्ठः
सबलैहितः । द्युम्नीश्लोकीससोम्यः । गिरावज्रोनसंभृतः । सबलोअनपच्यु
तः । ववक्षुरुग्रोअस्तृतः ॥ ३॥ बृहच्चास्तृतः ॥१ ॥ अनुमत्यैपुरोडाशमष्टाकं
पालंनिर्वपति । येप्रत्यंचः शम्यांयाअवशीयंते । तंनैर्ऋतमेकंकपालं । इयंवा
अनुमतिः । इयंनिर्ऋतिः । नैर्ऋतेनपूर्वेणप्रचरति । पाप्मानमेवनिर्ऋतिंपूर्वां ॥१०८॥
निरवदयते । एकंकपालोभवति । एकधैवनिर्ऋतिंनिरवदयते । यदहुत्वागार्ह

पत्यईयुः ॥ १ ॥ रुद्रोभूत्वाग्निरंनूत्थायं । अध्वर्युंचयजमानंचहन्यात् । वीहि
स्वाहाहुतिंजुषाणइत्यांह । आहुत्यैवैनं शमयति । नार्तिमार्च्छत्यध्वर्युर्नयज
मानः । एकोल्मुकेनयंति । तद्धिनिर्ऋत्यैभागधेयं । इमांदिशंयंति । एषावै
निर्ऋत्यैदिक् । स्वायामेवदिशिनिर्ऋतिंनिरवंदयते ॥ २ ॥ स्वकृतइरिणेजुहो
तिप्रदरेवां । यद्वैनिर्ऋत्याआयतंनम् । स्वएवायतंनेनिर्ऋतिंनिरवंदयते ।
एषतेंनिर्ऋतेभागइत्यांह । निर्दिंशत्येवैनां । भूतेहविष्मत्यसीत्यांह । भूतिमे
वोपावर्तते । मुंचेमम हंसइत्यांह । अं हंसएवैनंमुंचति । अंगुष्ठाभ्यांजु
होति ॥ ३ ॥ अंततएवनिर्ऋतिंनिरवंदयते । कृष्णंवासःकृष्णतूषंदक्षिणा । एतद्वै
निर्ऋत्यैरूपम् । रूपेणैवनिर्ऋतिंनिरवंदयते । अप्रंतीक्षमायंति । निर्ऋत्याअंतर्हिं

त्यै । स्वाहानमोयइदंचकारेतिपुनरेत्यगार्हपत्येजुहोति । आहुंत्यैवनंमस्यंतो
गार्हपत्यमुपावर्तंते । आनुमतेनप्रचंरति । इयंवाअनुंमतिः ॥ ४॥ इयमेवास्मै
राज्यमनुंमन्यते । धेनुर्दक्षिणा । इमामेवधेनुंकुरुते । आदित्यंचरुंनिर्वंपति ।
उभयींष्वेवप्रजास्वभिषिंच्यते । दैवीषुचमानुंषीषुच । वरोदक्षिणा । वरोहिरा
ज्य ँ समृंध्यै । आग्नावैष्णवमेकांदशकपालंनिर्वंपति । अग्निः सर्वादेवताः
॥ ५ ॥ विष्णुर्यज्ञः । देवताश्चैवयज्ञंचावंरुंधे । वामनोवहीदक्षिणा । य
द्वही । तेनाग्नेयः । यद्वामनः । तेनवैष्णवः समृंध्यै । अग्नीषोमीयमेकांदशक
पालंनिर्वंपति । अग्नीषोमाभ्यांवाइंद्रोवृत्रमंहन्निति । यदंग्नीषोमीयमेकांदश
कपालंनिर्वंपति ॥ ६ ॥ वार्त्रघ्नमेवविजित्यै । हिरंण्यंदक्षिणासमृंध्यै । इंद्रोवृ

त्रᳲहुत्वा । दे॒वता॑भिश्चेन्द्रि॒येण॑च॒व्या॑र्ध्यत । सए॒तमैन्द्रा॒ग्नमेका॑दशकपालमप
श्यत् । तन्निर॑वपत् । तेन॒वैसदे॒वता॑श्चेंद्रि॒यंचावा॑रुंध । यदैं॑द्रा॒ग्नमेका॑दशकपालं
नि॒र्वप॑ति । दे॒वता॑श्चै॒वतेनें॑द्रि॒यंच॒यज॑मा॒नोव॑रुन्धे । ऋ॒ष॒भोव॒ही॑दक्षि॑णा ॥ ७ ॥
यद्व॒ही । तेना॑ग्ने॒यः । यदृ॑ष॒भः । तेनैं॒द्रः सम॑ृध्यै । आ॒ग्ने॒यम॒ष्टाक॑पालंनि॒र्वप॑ति
ऐं॒द्रंदधि॑ । यदा॑ग्ने॒योभव॑ति । अ॒ग्निर्वैय॑ज्ञमु॒खं । य॒ज्ञमु॒खमे॒वर्द्धिंपु॒रस्ता॑द्धत्ते । यदैं॒
द्रंदधि॑ ॥८॥ इंद्रि॒यमे॒वाव॑रुंधे । ऋ॒ष॒भोव॒ही॑दक्षि॑णा । यद्व॒ही । तेना॑ग्ने॒यः । यदृ
ष॒भः । तेनैं॒द्रः सम॑ृध्यै । याव॑ती॒र्वैप्र॒जाओष॑धीना॒महु॑ताना॒माश्नन् । ताः परा॑भ
वन् । आ॒ग्र॒य॒णंभ॑वति॒हुता॒द्याय । यज॑मान॒स्याप॑राभावाय ॥९॥ दे॒वावा॒ओष॑
धीष्वा॒जिमं॑यु॒ः । ताइं॑द्रा॒ग्नीउद॑जयतां । तावे॒तमैन्द्रा॒ग्नंद्वाद॑शकपा॒लंनिर॑वृणातां ।

यदैंद्राग्नोभवत्युज्जित्यै । द्वादंशकपालोभवति । द्वादंशमासाः । संवत्सरः
संवत्सरेणैवास्माअन्नमवंरुन्धे । वैश्वदेवश्चरुर्भंवति । वैश्वदेवंवाअन्नंम् । अन्नंमे
वास्मैस्वदयति ॥ १० ॥ प्रथमजोवत्सोदाक्षिणासमृंध्यै ॥ सौम्यꣳश्यांमाकं
चरुंनिर्वंपति । सोमोवाअंकृष्टपच्यस्यराजा ॥ अकृष्टपच्यमेवास्मैस्वदयति ।
वासोदाक्षिणा । सौम्यꣳहिदेवतयांवासः समृंध्यै । सरंस्वत्यै चरुंनिर्वंपति ।
सरंस्वतेचरुंम् । मिथुनमेवावंरुन्धे । मिथुनौगावौदाक्षिणासमृंध्यै । एति
वाएषयंज्ञमुखादृध्याः । योग्नेर्दैवतांयाएति । अष्टावेतानिंहवीꣳषिभंवंति ।
अष्टाक्षंरागायत्री । गायत्रोग्निः । तेनैवयंज्ञमुखादृध्यांअग्नेर्दैवतांयैनैति ॥ ११ ॥ ॥११०॥
ईंयुर्निरवंदयतेंगुष्ठाभ्यांजुहोत्यनुंमतिर्दैवतानिर्वंपतिवहीदक्षिणायदैंद्रंदध्यपंरा

भावायस्वदयातिगावौदक्षिणासमृध्यैषट्चं ॥ मृत्युनायजमानंपरिगृह्णीयात् ।
यन्नपरिदध्यात् । रक्षांसि यज्ञं हन्युः । द्वौपरिधीपरिदधाति । रक्षसाम
पहत्यै । अथोमृत्योरेवयजमानमुत्सृजति । यत्त्रीणित्रीणिहवींष्युदाहरेयुः ।
त्रयस्त्रयएषां साकंप्रमीयेरन् । एकैकमनूचीनान्युदाहरंति । एकैकएवैषां
मन्वंचः प्रमीयते । कशिपुंकशिपव्यांय ॥ उपबर्हणमुपबर्हण्यांय । आंजनमां
जन्यांय । अभ्यंजनमभ्यंजन्यांय । यथाभागमेवैनान्प्रीणाति ॥ १ ॥ त्र्यंब
कंयजामहइत्यांह । मृत्योर्मुक्षीयमामृतादितिवावैतदांह । उत्किरंति । भगं
स्यलीप्संते । मूतंकृत्वासंजंति । यथाजनंयतेवसंकरोति । तादृगेवतत् । एषते
रुद्रभागइत्यांहनिरवंत्यै । अप्रतीक्षमायंति । अपः परिषिंचति । रुद्रस्यांतर्हिं

त्यै । प्रवाएतेंस्माल्लोकाच्च्यवंते ॥ येऽयंबकैश्चरंति । आदित्यंचरुंपुनरेत्यानि
र्वंपति । इयंवाअदितिः । अस्यामेवप्रतितिष्ठंति ॥ १ ॥ ओदनमुद्बुवते । पर
मेष्ठीवाएषः । यदोदनः परमामेवैनं॑श्रियंगमयति । सुश्लोकां ३ सुमंगलां ३
सत्यंराजा ३ नित्याह । आशिषमेवैतामाशास्ते । शौनः शेपमाख्यापयते ।
वरुणपाशादेवैनंमुंचति । परः शतंभवति । शतायुः पुरुषः शतेंद्रियः ॥ आयु
ष्येवेंद्रियेप्रतितिष्ठति । मारुतस्यचैकंवि ं॑शतिकपालस्यवैश्वदेव्यैचामिक्षां
याअग्नयेंस्विष्टकृतेंसमवद्यति । देवताभिरेवैनमुभयतः परिगृह्णाति । अपांनप्त्रे
स्वाहोर्जोंनप्त्रेस्वाहाग्नयेंगृहपतयेस्वाहेतितिस्रआहुतीर्जुहोति । त्रयइमेलोकाः ।
एष्वेवलोकेषुप्रतितिष्ठति ॥ इयंवैरजता । असौहरिणी । यद्रुक्मौभवतः ।

आभ्यामेवैनमुभयतः परिगृह्णाति । वरुणस्यवा अभिषिच्यमानस्यापः । इन्द्रि यंवीर्यंनिरघ्नन् । तत्सुवर्णं ँ हिरण्यमभवत् । यद्रुक्ममंतर्दधाति । इंद्रियस्य वीर्यस्यानिर्घाताय । शतमानोभवतिशतक्षरः । शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेंद्रियेप्रतितिष्ठति । आयुर्वैहिरण्यं । आयुष्याएवैनमभ्यातिक्षरंति । तेजोवैहिरण्यं । तेजस्याएवैनमभ्यातिक्षरंति । वर्चोवैहिरण्यं । वर्चस्याएवैनमभ्यतिक्षरंति ॥ १ ॥ ब्राह्मणप्रथमाष्टकेमंत्रसंग्रहः समाप्तः ॥

॥ ब्राह्मणद्वितीयाष्टकेमंत्रसंग्रहप्रारंभः ॥

ऐन्द्राग्नमुपसादितम् । सर्वाभ्योवाएषदेवताभ्योजुहोति । योग्निहोत्रं जुहोति । यथाखलुवैधेनुंतीर्थेतर्पयति । एवमग्निहोत्रीयजमानंतर्पयति । तृप्यतिप्रजया

मंत्र- पुशुभिः । प्रसुवर्गंलोकंजानाति । पश्यंतिपुत्रम् । पश्यंतिपौत्रम् । प्रप्रजयां संग्रहः
॥११२॥ पुशुभिर्मिथुनैर्जायते । यस्यैवंविदुषोंग्निहोत्रंजुहोति । यउंचैनदेवंवेद ॥ १ ॥
ऋतंत्वांसत्येनपरिषिंचामीतिंसायंपरिषिंचति । सत्यंत्वर्तेनपरिषिंचामीति
प्रातः । अग्निर्वाऋतम् । असावांदित्यः सत्यम् । अग्निमेवतदांदित्येनंसायं
परिषिंचति । अग्निनांदित्यंप्रातः सः । यावंदहोरात्रेभवंतः । तावंदस्य
लोकस्यं । नार्तिर्नरिष्टिः । नांतोनपर्यंतोंस्ति । यस्यैवंविदुषोंग्निहोत्रंजुहोति ।
यउंचैनदेवंवेद ॥ १ ॥ आस्तिद्वेचं ॥ यत्संभारा । ततोवैतेभ्योयज्ञःप्राभवत् ।
यत्संभाभरावन्ति । यज्ञस्यप्रभूत्यै। आतिथ्यमासाद्यव्याचष्टे ।यज्ञमुखंवाआ ॥११२॥
तिथ्यं । मुखतएवयज्ञं २ संभृत्यप्रतंनुते । अयंज्ञोवाएषः । योपत्नीकः ।

नप्रजाः प्रजायेरन् । पत्नीव्याचष्टे । यज्ञमेवार्कः । प्रजानांप्रजननाय । उप
सत्सुव्याचष्टे । एतद्वैपत्नीनामायतनम् । स्वएवैनाआयतनेवंकल्पयति ॥ १ ॥
अपक्रामन्तुगर्भिण्यः। प्रजापतिरकामयतप्रजायेयेति । सतपोतप्यत । सोन्त
र्वानभवत् । सहरितः श्यावोभवत् । तस्मात्त्र्यन्तर्वत्नी । हरिणीसतीश्यावा
भवति । सविजायमानोगर्भेणाताम्यत् । सतान्तःकृष्णः श्यावोभवत् । तस्मा
त्त्रान्तः कृष्णः श्यावोभवति ॥ १ ॥ तस्यासुरेवाजीवत् । तेनासुनासुरानसृ
जत । तदसुराणामसुरत्वम् । यएवमसुराणामसुरत्वंवेद । असुमानेवभवति । नै
नमसुर्जहाति । सोसुरान्त्सृष्ट्वापितेवामन्यत । तदनुपितृनसृजत । तत्पितॄणांपितृ
त्वम्। यएवंपितॄणांपितृत्वंवेद। पितेवैवस्वानांभवति॥२॥ यंत्यंस्यपितरोहवम्।

सपितृन्तमृक्ष्वामंनस्यत् । तदनुंनुष्यांनसृजत् । तन्मंनुष्याणांमनुष्युत्वम् । यए
वंमंनुष्यांणांमनुष्युत्वंवेदं । मनुस्व्यैवभंवति । नैनंमनुंर्जहाति । तस्मैमनुष्यां
न्तसमृज्ञानायं । दिवांदेवंत्राभंवत् । तदनुदेवानंसृजत । तद्देवानांदेवुत्वम् । यए
वंदेवानांदेवुत्वंवेदं । दिवांहैवास्यंदेवुत्राभंवति । तानिवाएतानिंचुत्वार्यम्भाँ
सि । देवामंनुष्यांः पितरोसुंराः । तेषुंसर्वैष्वंभोनभंइवभवति । यएवंवेदं ॥३॥
आजीवितसानांभवतिदेवानंसृजतसूतचं ॥ प्रजापंतिः सोमुंराजांनमसृजत ।
तंत्रयोवेदाअन्वंसृज्यंत । तान्हस्तैंकुरुत । अथुहसीतांसावित्री । सोमुंराजांनं
चकमे । श्रद्धामुसचंकमे । साहंपितरंप्रजापंतिमुपंससार । तंहोंवाच । नमं
स्तेअस्तुभगवः । उपंत्वायानि ॥१॥ प्रत्वांपद्ये । सोमंवैराजांनंकामये । श्रद्धा

मुसकामयतइति । तस्यांउहस्थांगुरमलंकुारंकल्पयित्वा । दशंहोतारंपरस्ता
द्व्याख्यायं । चतुंर्होतारंदक्षिणुतः । पंचंहोतारंपुश्चात् । षड्ढोतारमुत्तंरुतः ।
सुप्तहोंतारमुपरिष्टात् । सुंभुारैश्चुपत्निभिश्चमुखेलंकृत्यं ॥ २ ॥ आस्यार्धंवं
व्राज । ताᳬहोदीक्ष्योवाच । उपमावर्तस्वेति । तᳬहोवाच । भोगंतुमआचंक्ष्व ।
एतन्मुआचक्ष्व । यत्तेपुाणाविति । तस्यांउहत्रीन्वेदान्प्रदंदौ । तस्मुादुहस्त्रि
युोभोगमेवहारयन्ते। सयः कुामयेतप्रियः स्यामिति । यंवांकुामयेतप्रियः स्या
दिति । तस्मांएतᳬस्थांगुरमलंकुारंकल्पयित्वा । दशंहोतारंपुरस्ताद्व्याख्यायं ।
चतुंर्होतारंदक्षिणुतः । पंचंहोतारंपुश्चात् । षड्ढोतारमुत्तरुतः । सुप्तहोंतारमुप
रिष्टात् । सुंभुारैश्चुपत्निभिश्चमुखेलंकृत्यं । आस्यार्धंव्रंजेत् । प्रियोहैवभं

वर्ति ॥ ३ ॥ अयान्यलंकृत्यंस्यामितिभवति ॥ १ ॥ ब्रह्मात्मन्वदंसृजत ।
तदंकामयत । समात्मानापद्येयेति । आत्मन्नात्मन्नित्यामंत्रयत। तस्मैदशमः
हूतः प्रत्यशृणोत् । सदशंहूतोभवत् । दशंहूतोहवैनामैषः । तंवाएतंदशं
हूतंसंतम् । दशंहोतेत्याचक्षतेपरोक्षेण । परोक्षप्रियाइवहिदेवाः ॥ १ ॥ आत्मन्
न्नात्मन्नित्यामंत्रयत । तस्मैसप्तमःहूतः प्रत्यशृणोत् । ससप्तहूतोभवत् ।
सप्तहूतोहवैनामैषः। तंवाएतंसप्तहूतंसंतम् । सप्तहोतेत्याचक्षतेपरोक्षेण।परो
क्षप्रियाइवहिदेवाः । आत्मन्नात्मन्नित्यामंत्रयत । तस्मैषष्ठःहूतः प्रत्यशृ
णोत् । सषड्ढूतोभवत् ॥ २ ॥ षड्ढूतोहवैनामैषः । तंवाएतंषड्ढूतंसंतम् । षड्ढो
तेत्याचक्षतेपरोक्षेण । परोक्षप्रियाइवहिदेवाः । आत्मन्नात्मन्नित्यामंत्रयत ।

॥११४॥

तस्मैपंचुमꣳहूतः प्रत्यंशृणोत् । सपंचंहूतोभवत् । पंचंहूतोहवैनामैषः ।
तंवाएतंपंचहूत ꣳ संतंम् । पंचंहोतेत्याचंक्षतेपुरोक्षेंण ॥ ३ ॥ पुरोक्षंप्रियाइ
वाहिदेवाः । आत्मन्नात्मन्नित्यामंत्रयत । तस्मैचतुर्थं ꣳ हूतः प्रत्यंशृणोत् ।
सचतुंर्हूतोभवत् । चतुंर्हूतोहवैनामैषः । तंवाएतंचतुंर्हूत ꣳसंतंम् । चतुंर्हो
तेत्याचंक्षतेपुरोक्षेंण । पुरोक्षंप्रियाइवाहिदेवाः । तमंब्रवीत् । त्वंवैमेनेदिष्ठꣳ
हूतः प्रत्यंश्रौषीः । त्वयैनानाख्यातारइति । तस्मान्नुहैनाꣳश्चतुंर्होतारइ
चंक्षते । तस्मांच्छुश्रूषुः पुत्राणाꣳहद्यंतमः । नेदिंष्ठोहद्यंतमः । नेदिंष्ठोब्रह्मंणो
भवति।यएवंवेद॥४॥देवाः षड्ढूतोभवत्पंचंहोतेत्याचंक्षतेपुरोक्षेंणाश्रौषीः षट्चं ।
हव्यवाहंमभिमातिषाहंम् । रक्षोहणंपृतंनासुजिष्णुम् । ज्योतिष्मंतंदीद्यंतंपुरं

धिम् । अग्निं स्विष्टकृतमाहुवेम । स्विष्टमग्नेअभितत्पृणाहि । विश्वांदेवपृतंनां
अभिष्य । उरुन्नः पंथांप्रदिशन्विभांहि । ज्योतिष्मद्धेह्यजरंनआयुः । त्वामं
ग्नेहविष्मंतः । देवंमर्तांसईडते ॥ १ ॥ द्वाविमौवातौवातः । आसिंधोरापंराव
तः । दक्षंमेअन्यआवातु । परान्योवांतुयद्रपंः । यददोवांततेगृहे । अमृतंस्य
निधिर्हितः । ततोंनोदेहिजीवसें । ततोंनोधेहिभेषजम् । ततोंनोमहआवंह ।
वातआवांतुभेषजम् । शंभूर्मयोभूर्नोंहृदे ॥ १ ॥ प्रणआयूं षितारिषत् ।
त्वमंमेअयासिं । अयासन्मनंसाहितः । अयासन्हव्यमूंहिषे । अयानोंधेहिभेष
जम् । इष्टोअग्निराहुतः । स्वाहांकृतःपिपर्तुनः । स्वगादेवेभ्यइदंनमः । कामोंभ
तस्यभव्यंस्य । सम्राडेकोविरांजति ॥ १ ॥ चक्षुंषोहेतेमनंसोहेते । वाचोंहेते

ब्रह्मंणोहेते । योमांघायुरंभिदांसति । तमंग्नेमुन्यामेनिंकृंणु । योमाचक्षुंषायो
मनंसा । योवाचाब्रह्मंणाघायुरंभिदासंति । तयांग्नेत्वंमेन्या । अमुमंमेनिंकृंणु ।
यत्किंचासौमनंसायच्चंवाचा । युज्ञैर्जुहोतियजुंषाहुविर्भिः ॥ १ ॥ तन्मृत्युर्नि
र्ऋंत्यासंविदानः । पुरादिष्टादाहुंतीरस्यहंतु । यातुधानानिर्ऋंतिरादुरक्षः । ते
अंस्यघ्नंत्वनृंतेनसत्यम् । इंद्रेषिताआज्यंमस्यमथ्नंतु । मातत्समृंद्धियदसौ
करोति । हन्मितेहंकृत ँ हविः । योमेंघोरमचींकृतः । अपांचौतउभौबाहो ।
अपंनह्याम्यास्यं ॥ २ ॥ अपंनह्यामितेबाहू ॥ ३ ॥ अपंनह्याम्यास्यंम् । अ
ग्नेर्दैवस्यब्रह्मंणा । सर्वंतेवधिषंकृतं । पुरामुष्यंवषट्कारात् । यज्ञंदेवेषुंनस्कृधि ।
स्विष्टमस्माकंभूयात् । मास्मान्प्रापन्नरांतयः । अंतिदूरेसतोअंग्ने । भ्रातृंव्य

स्याभिदासंतः ॥ ३ ॥ वषट्कारेणवज्रेण । कृत्या २ हंन्मिकृतामहं । योमान
कंदिवांसायं । प्रातश्चाह्नोंनिपीयंति । अद्यातमिंद्रवज्रेण । भ्रातृव्यंपादयामसि।
इंद्रस्यगृहोंसितंत्वां । प्रपंद्येसगुः साश्वः । सहयन्मेअस्तितेनं । ईडेअग्निंविप
श्चितं ॥ ४ ॥ वय २ सोमव्रतेतव । मनंस्तनूषुबिभ्रंतः । प्रजावंतोअशीमहि
॥ १ ॥ अग्निश्चंविष्णोतपंउत्तमंमहः । दीक्षापालेभ्योवनंत २ हिशंका । विश्वै
र्देवैर्यज्ञियैः संविदानौ । दीक्षामस्मैयजंमानायधत्तं । प्रतद्विष्णुंस्तवतेवीर्याय ।
मृगोनभीमः कुंचरोगिरिष्ठाः । यस्योरुषुंत्रिषुविक्रमंणेषु । अधिक्षियंतिभुवंना
निविश्वां । नूमर्तोदयतेसनिष्यन्यः । विष्णवउरुगायायदाशंत ॥ १ ॥ प्रयः
सवाचामनंसायजाते । एतावंतंनयँमाविवांसात । विचंक्रमेपृथिवीमेषएताम ।

क्षेत्रांयाविष्णुर्मनुषेदशस्यन् । ध्रुवासौअस्यकीरयोजनांसः । उरुक्षितिः सु
जनिमाचकार । त्रिर्देवः पृथिवीमेषएताम् । विचंक्रमेशतर्चंसंमहित्वा । प्रवि
ष्णुरस्तुतवसः स्तवीयान् । त्वेषः ह्यस्य स्थविरस्यनाम ॥ १॥ त्वः सोम
क्रतुभिः सुक्रतुर्भूः । त्वंदक्षैसुदक्षोविश्ववेदाः । त्वंवृषावृषत्वेभिर्महित्वा । द्युम्ने
भिर्द्युम्न्यंभवोनृचक्षाः । अषाढंयुत्सुपृतनासुपप्रिम् । सुवर्षामप्स्वांवृजनस्यगो
पां । भरेषुजाः सुक्षितिः सुश्रवसं । जयंतंत्वामनुमदेमसोम । भवांमित्रोनशे
व्योघृतासुतिः । विभूतद्युम्नएवयाउसप्रथाः ॥ १ ॥ संगच्छध्वः संवदध्वं ।
संवोमनांः सिजानताम् । देवाभागंयथापूर्वे । संजानानाउपासते । समानो
मंत्रः समितिः समानी । समानंमनः सहचित्तमेषां । समानंकेतोअभिसः

रंभध्वं । संज्ञानेनवोहविषांयजामः । समानीवआकूतिः । समानाहृदयानिवः ॥
समानमस्तुवोमनः । यथावः सुसहासति ॥ १ ॥ दृढान्यौघ्रादुग्रमाअनुओजः ।
अवाभिनत्ककुभः पर्वतानाम् । आनोअग्नेसुकेतुना । रयिंविश्वायुपोषसं । मा
र्डीकंधेहिजीवसे । त्व ँ सोममहेभगं । त्वंयूनऋतायते । दक्षंदधासिजीवसे ।
रथंयुंजतेमरुतः शुभेसुगं । सूरोनामित्रावरुणागविष्टिषु ॥ १ ॥ तदस्यप्रियम
भिपाथोअश्यां नरोयत्रदेवयवोमदन्ति । उरुक्रमस्यसहिबन्धुरित्था । विष्णोः
पदेपरमेमध्वउत्सः । क्रत्वादाअस्तुश्रेष्ठः । अद्यत्वावन्वन्त्सुरेक्णाः । मर्तआ
नाशसुवृक्तिं । इमाब्रह्मब्रह्मवाह । प्रियातआबर्हिः सीद । वीहिसूरपुरोडाशम् ।
कनात्काभात्रआभर । प्रयत्पस्यंनिवसकथ्यौ । विनंइन्द्रमृधोजहि । कनीखुनादिव

सापयन् । अभिनुः सुष्टंतिंनय । प्रजापतिस्त्रियायशः । मुष्कयोरदधात्सपं ।
कामस्यतृप्तिमानंदं । तस्यांग्नेभाजयेहमां । मोदः प्रमोदआनंदः । मुष्कयो
र्निहितः सपः । मृत्वेवुकामस्यतृप्याणि । दक्षिणानांप्रतिग्रहे । मनसाश्चित्तमा
कूतिं । वाचः सत्यमंशीमहि । पशूना ँ रूपमन्नस्य । यशः श्रीः श्रयतांम
यि । यथाहमस्याअतृप ँ स्त्रियैपुमान् । यथास्त्रीतृप्यंतिपुं सि प्रियेप्रिया ।
एवंभगस्यतृप्याणि ॥ २ ॥ यज्ञस्यकाम्यः प्रियः । ददामीत्यग्निर्वदाति । तथे
तिवायुराहतत् । हंतेतिसत्यंचन्द्रमाः । आदित्यः सत्यमोमिति । आपस्तत्स
त्यमाभरन् । यशोयज्ञस्यदक्षिणाम् । असौमेकामःसमृध्यतां । नहिस्पशमवि
दन्नन्यमस्मात् । वैश्वानरात्पुरएतारमग्नेः ॥ ३ ॥ अथैममन्थन्नमृतममूराः ।

वैश्वानरंक्षेत्रजित्यांयदेवाः । येषामिमेपूर्वेअर्मासआसंन् । अयूपाः सद्मवि
भृंतापुरूणि । वैश्वांनरत्वयातेनुत्ताः। पृथिवीमुन्यमभितंस्थुर्जनांसः । पृथिवीं
मातरंमुहीम् । अंतरिक्षमुपंब्रुवे । बृहतीमूतयेदिवं । विश्वादिभर्तिपृथिवी ।
अंतरिक्षंविपंप्रथे । दुहेद्यौर्बृहतीपयः । नतानंशांतिनदंभातितस्करः । नैनांअ
मित्रोव्यथिरादंधर्षति । देवाःश्चयाभिर्यजतेददांतिच । ज्योगित्ताभिः सच
तेगोपतिः सह । नताअर्वारेणुकंकाटोअश्नुते । नसंस्कृतत्रमुपंयंतिताअभि ।
उरुगायमभयंतस्यताअनु । गावोमर्त्यस्यविचरंतियज्वनः ॥ १ ॥ रात्री
व्यख्यदायती । पुरुत्रादेव्यंक्षभिः । विश्वाअधिश्रियोधित । उपतेगाइवाक
रम । वृणीष्वदुहितर्दिवः । रात्रीस्तोमंनजिग्युषी । देवींवाचमंजनयंतदेवाः ,

तांविश्वरूपाः पशवोवदंति । सानोमंद्रेषमूर्जंदुहाना । धेनुर्वागस्मानुपसुष्टु
तैतु ॥ १ ॥ यद्वाग्वदंत्यविचेतनानि । राष्ट्रीदेवानांनिषसादमंद्रा । चतस्रऊ
र्जंदुदुहे पयांॅसि । क्वस्विदस्याः परमंजगाम । गौरीर्मिमायसलिलानितक्षती ।
एकपदीद्विपदीसाचतुष्पदी । अष्टापदीनवपदीबभूवुषी । सहस्राक्षरापरमे
व्योमन् । तस्यांॅ समुद्राअधिविक्षरंति । तेनंजीवंतिप्रदिशश्चतस्रः ॥ १ ॥
प्राणोरक्षतिविश्वमेजत् । इर्योभूत्वाबहुधाबहूनि । स इत्सर्वं व्यानशे । योदे
वोदेवेषुविभूरंतः । आवृदूदात्क्षेत्रियध्वगद्वृषा । तमित्प्राणंमनसोपशिक्षत । अग्रं
देवानामिदमंत्तुनोहविः । मनसश्चित्तेदम् । भूतंभव्यंचगुप्यते । तद्धिदेवेष्वग्रियम्
॥ १ ॥ आनएतुपुरश्चरं । सहदेवैरिमॅं हवं । मनः श्रेयसि श्रेयसि । कर्मन्यज्ञप

तिंदधंत् । जुषतांमिदमिदं हविः । विराड्देवीपुरोहिता । हव्यवाडनंपा
यिनी । ययारूपाणिबहुधावदंति । पेशांसिदेवाः परमेजनित्रे । सानोविराडनंम
स्फुरंती ॥ २ ॥ वाग्देवीजुषतामिदंहविः । चक्षुर्देवानांज्योतिरमृतेन्यंक्तम् ।
अस्यविज्ञानायबहुधानिधीयते । तस्यंसुम्नमशीमहि । मानोहासीद्विचक्षणम् ।
आयुरिन्नः प्रतीर्यतां । अनंधाश्चक्षुषावयं । जीवाज्योतिरशीमहि । सुवर्ज्यो
तिरुतामृतंम् । श्रोत्रेणभद्रमुतशृण्वंतिसत्यम् । श्रोत्रेणवाचंबहुधोद्यमानां । श्रो
त्रेणमोदश्चमहश्चश्रूयते । श्रोत्रेणसर्वादिशआशृणोमि । येनप्राच्यांउतदक्षि
णा । प्रतीच्यैदिशः शृण्वंत्युत्तरात् । तदिच्छ्रोत्रंबहुधोद्यमानम् । अरान्ननेमिः
परिसर्वंबभूव ॥ ३ ॥ अग्रियमनंपस्फुरंतीसत्यं सप्तचं ॥ १ ॥ जेताशत्रून्वि

चर्षणिः । आकूत्यैत्वाकामायत्वासमृधेत्वा । पुरोदधेअमृतत्वायजीवसे । आ
कूतिमस्यावसे । काममस्यसमृध्यै । इंद्रस्ययुंजतेधियः । आकूतिंदेवींमनसः
पुरोदधे । यज्ञस्यमातासुहवामेअस्तु । यदिच्छामिमनसासकामः । विदेयमे
नद्धृदयेनिविष्टं॥ १॥ वार्त्रहत्यायशवसे । पृतनासाह्यायच । इंद्रत्वावर्तयामसि ।
सुब्रह्माणंवीरवन्तंबृहन्तम् । उरुंगभीरंपृथुबुध्नमिन्द्र ॥ श्रुतर्षिमुग्रमभिमाति
षाहम् । अस्मभ्यंचित्रंवृषणंरयिंदाः । क्षेत्रियैत्वानिर्ऋत्यैत्वा । द्रुहोमुंचामि
वरुणस्यपाशात् । अनागसंब्रह्मणेत्वाकरोमि ॥ २ ॥ शिवेतेद्यावापृथिवीउ
भेइमे । शंतेअग्निः सहाद्भिरस्तु । शंद्यावापृथिवीसहौषधीभिः । शमंतरिक्षं
सहवातेनते । शंतेचतस्रः प्रदिशोभवंतु । यादेवीश्चतस्रःप्रदिशः । वातपत्नी

 रभिसूर्योविचष्टे । तासांत्वाजरसआदंधामि । प्रयक्ष्मंएतुनिर्ऋतिंपराचैः । अ
मोचियक्ष्मांदुरितादवंत्यै ॥ ३ ॥ द्रुहः पाशान्निर्ऋत्यैचोदमोचि । अहाअवर्ति
मविंदत्स्योनम् । अप्ययंभूद्भद्रेसुकृतस्यंलोके । सूर्यमृतंतमसोग्राह्यायत् । देवा
अमुंचन्नसृजन्व्येनसः । एवमहामिमंक्षेत्रियाज्जामिशं ऽ सात् । द्रुहोमुंचामि
वरुणस्यपाशात् । बृहस्पतेयुवामिंद्रश्चवस्वः । दिव्यस्येशाथेउतपार्थिवस्य ।
धत्त ऽ रयिं ऽ स्तुवतेकीरयेचित् ॥ ४ ॥ यूयंपात स्वस्तिभिःसदानः । देवा
युधमिंद्रमाजोहुवानाः । विश्वावृधंमभियेरक्षमाणाः । येनंहुतादीर्घमध्वानमा
यंन् । अनंतमर्थमनिवत्स्यमानाः । यत्तेसुजातोहिमवंत्सुभेषजम् । मयोभूः
शंतमायद्भद्रोसि । ततोनोदेहिसीबले । अदोगिरिभ्योअधियत्प्रधावसि ।

सुꣳशोभंमानाकुन्यैवशुभ्रे ॥ ५ ॥ तांत्वामुद्रंलाहविषांवर्धयंति । सानः सीव
ले रयिमाभांजयेह । पूर्वं देवा अपंरेणानुपश्युन् जन्मंभिः । जन्मान्यवंरैः प
रांणि । वेदांनिदेवाअयमुस्मीतिमां । अहꣳ हित्वाशरींरंजरसंः पुरस्तांत् ।
प्राणापानौचक्षुःश्रोत्रं । वाचंमनंसिसंभृंतां । हित्वाशरींरं जरसंः पुरस्तांत् ।
आभूतिंभूतिंवयमंश्नवामहै । इमाएवताउषसोयाः प्रंथमाव्यौच्छन् । तादे
व्यंःकुर्वतेपंचंरूपा । शश्वंतीनांवंपृज्यंति । नगंमृत्यंतं ॥६॥ करोम्यवंत्यौंचिच्छु
भ्रेऽश्नवामहैचुत्वारिंच ॥ ७ ॥ यूयंपांत स्वस्तिभिः सदांनः । नाकेंसुपर्णमुप
यत्पतंतं । ह्रदावेनंतोअभ्यचंक्षतत्वा । हिरंण्यपक्षंवरुंणस्यदूतं । यमस्ययोनौ
शकुनंभुरण्युं । शन्नोंदेवीरभिष्टंये । आपोंभवंतुपीतयें । शंयोरभिस्रंवंतुनः । ईशां

नावार्यीणां । क्षयंतीश्चर्षणीनाम् ॥ १॥ आपोयाचामिभेषजम् । अप्सुमेसोमो
अब्रवीत् । अंतर्विश्वानिभेषजा । अग्निंचविश्वशंभुवम् । आपश्चविश्वभेषजीः ।
यदप्सुतेसरस्वति । गोष्वश्वेषुयन्मधु । तेनमेवाजिनीवति । मुखमद्धिसर
स्वति । यासरस्वतीवैशंभुल्या ॥ १ ॥ तस्यांमेरास्व । तस्यास्ते भक्षीय ।
तस्यास्तेभूयिष्ठभाजोभूयास्म । अहंत्वदस्मिमदसित्वमेतत् । ममासियोनि
स्तवयोनिरस्मि । ममैवसन्वहहव्यान्यग्ने । पुत्रःपित्रेलोककृज्जातवेदः । इहैव
सन्तत्रसंतंत्वाग्ने । प्राणेनवाचामनसाबिभर्मि । तिरोमासंतमायुर्माप्रहासीत् । १।
ज्योतिषात्वावैश्वानरेणोपतिष्ठे । अयंतेयोनिर्ऋत्वियः । यतोजातोअरोच
थाः । तंजानन्नग्नआरोह । अथानोवर्धयारयिं । यातेअग्नेयज्ञियातनूस्तयेह्यारो

ह्रात्मात्मानं। अच्छावसूनिकृण्वन्नस्मेनर्यांपुरूणिं। युज्ञोभूत्वायुज्ञमासीदुस्वां योनिं। जातवेदोभुवआजायमानः सक्षयुएहिं। उपावंरोहजातवेदः पुनुस्त्वं॥ साम्राज्यायसुक्रतुः। देवस्यंत्वासवितुःप्रंसवे अश्विनोंर्बाहुभ्यां। पूष्णोहस्तां भ्यां। अश्विनोर्भैषंज्येन। तेजंसेब्रह्मवर्चसायाभिषिंचामि। देवस्यंत्वासवितुः प्रंसवे। अश्विनोंर्बाहुभ्यां। पूष्णोहस्तांभ्यां। अश्विनोर्भैषंज्येन। तेजंसेब्रह्म वर्चसायाभिषिञ्चामि। देवस्यंत्वासवितुः प्रंसवे। अश्विनोंर्बाहुभ्यां। पूष्णो हस्तांभ्यां। सरंस्वत्यैभैषंज्येन॥१॥ वीर्यांयान्नाद्यांयाभिषिंचामि। देवस्यंत्वा सवितुःप्रंसवे। अश्विनोंर्बाहुभ्यां। पूष्णोहस्तांभ्यां। इन्द्रंस्येन्द्रियेणं। श्रियैयशं सेबलांयाभिषिञ्चामि। कोंसिकतमोंसिकस्मैंत्वाकायंत्वा। सुश्लोका३ सुमं

ङ्ला॒२॑३सत्यंराजा३न् । शिरोमेश्रीः ॥ १ ॥ द्रुपदादिवेन्मुमुचानः । स्विन्नःस्ना
त्वीमलादिव । पूतंपवित्रेणेवाज्यं । आपंःशुंधन्तुमैनंसः ॥ रूप॒२॑रूपमधुः सुते ।
ऋतुथेंद्रोवनस्पतिः । शशुमानःपरिस्रुतां । कीलालमश्विभ्यांमधुं । दुहंधेनुः सरं
स्वती । गोभिर्नसोमंमश्विना । मासंरेणपरिष्कृतां । समंधाता॒२॑सरंस्वत्या । स्वा
हेंद्रेसुतंमधुं ॥ १ ॥ उशंतंस्त्वाहवामहउआनोअग्नेसुकेतुनां । त्व॒२॑सोममहेभगं
त्व॒२॑सोमप्रचिकितोमनीषा । त्वयाहिनःपितरःसोमपूर्वेत्व॒२॑सोमपितृभिःसंवि
दानः । बर्हिषदःपितरआहंपितॄन् । उपंहूताःपितरोग्निष्वात्ताःपितरः । अग्निष्वा
त्तानृतुमतोहवामहे । नराश॒२॑सेसोमपीथंयेआशुः । तेनोअवंतःसुहवांभवंतु ।
शन्नोभवंतद्विपदेशंचतुष्पदे । येअंग्निष्वात्तायेनाग्निष्वात्ताः ॥ १ ॥ अं॒२॑होमुचः

पितरः सोम्यासः । परेवरेमृत्तांसोभवंतः ॥ अधिब्रुवंतुतेअवंत्वस्मान् । वान्यां
यैदुग्धेजुषमाणाः करंभं । उदीरांणाअवरेपरेच । अग्निष्वात्ताऋतुभिः संवि
दानाः । इंद्रवंतोहविरिदंजुषंतां । यदंग्नेकव्यवाहनत्वमंग्नइडितोजातवेदः । मातं
लीकव्यैः । येतांतपुर्देवत्राजेहमानाः । होत्रावृधःस्तोमतष्टासोअर्कैः । आग्ने
याहिसविदत्रैभिरर्वाङ् । सत्यैः कव्यैःपितृभिर्घर्मसाद्भिः । हव्यवाहमजरंपुरु
प्रियं । अग्निंघृतेनंहविषांसपर्यन् । उपांसदंकव्यवाहंपितृणां । सनः प्रजांवीर
वती २ समृंण्वतु ॥ २ ॥ अनांग्निष्वात्ताजेहमानाः सुतंचं ॥ १ ॥ सिंऽहे व्याघ्र
उतयापृदाकौ । त्विषिरग्नौब्राह्मणेसूर्यैया । इन्द्रंयादेवीसुभगांजजानं । सान
आगन्वर्चसासंविदाना । याराजन्येदुंदुभावायतायां ॥ अश्वस्यक्रंद्येपुरुंषस्य

मायौ । इंद्रंयादेवीसुभगांजुजानं । सानुआगुन्वर्चसासंविदाना । याहास्तिनिं
द्धीपिनियाहिरंण्ये । त्विषिरश्वेषुपुरुषेषुगोषु ॥१॥ इंद्रंयादेवीसुभगांजुजानं । सा
नुआगुन्वर्चसासंविदाना। रथेअक्षेषुवृषभस्युवाजें । वातेपुर्जन्येवरुणस्युशुष्मे ।
इंद्रंयादेवीसुभगांजुजान । सानुआगुन्वर्चसासंविदाना । राडंसिविराडंसि ।
सुम्राडंसि स्वुराडंसि । इंद्रायत्वातेजंस्वतेतेजंस्वन्त ँ श्रीणामि ॥ इंद्रायुत्वौजं
स्वतओजंस्वंत ँ श्रीणामि । इंद्रायत्वापयंस्वतुपयंस्वंत ँ श्रीणामि । इंद्रा
युत्वायुंष्मतुआयुंष्मंतँश्रीणामि । तेजोंसि । तत्तेप्रयंच्छामि । तेजंस्वदस्तुमे
मुखं । तेजंस्वच्छिरोंअस्तुमे । तेजंस्वान्विश्वतःप्रत्यङ् । तेजंसासंपिंपृग्धिमा ।
ओजोंसि । तत्तेप्रयंच्छामि ॥३॥ ओजंस्वदस्तुमेमुखं । ओजंस्वच्छिरोंअस्तु

मे। ओजंस्वान्विश्वतः प्रत्यङ्। ओजंसासंपिंपृग्धिमा। पयोंसि। तत्तेप्रयं
च्छामि। पयंस्वदस्तुमेमुखं। पयंस्वच्छिरोंअस्तुमे। पयंस्वान्विश्वतःप्रत्यङ्।
पयंसासंपिंपृग्धिमा॥४॥आयुरंसि। तत्तेप्रयंच्छामि। आयुंष्मदस्तुमेमुखंम्।
आयुंष्मच्छिरोंअस्तुमे। आयुंष्मान्विश्वतः प्रत्यङ्। आयुंषासंपिंपृग्धिमा।
इममंग्नआयुंषे वर्चंसेकृधि। प्रियꣳरेतोंवरुणसोमराजन्। मातेवांस्माअदिते
शर्मंयच्छ। विश्वेंदेवाजरंदृष्टिर्यथासंत्॥ ५ ॥ आयुंरसिविश्वायुंरसि। सुर्वायुं
रसिसर्वंमायुंरसि। यतोवातोमनोंजवाः। यतःक्षरंतिसिंधंवः। तासांत्वासर्वांसाꣳ
रुचा। अभिषिंचामिवर्चंसा। समुद्रइंवासिगुह्मनां। सोमंइवास्यदांभ्यः। अग्नि
रिंवाविश्वतः प्रत्यङ्। सूर्यंइवज्योतिंषाविभूः॥ ६॥ अपांयोद्रवंणेरसंः। तमह

मंत्र- मुस्माऽआंमुष्यायुणायं । तेजंसेब्रह्मवर्चसायंगृह्णामि । अपांयऊर्मीरसः । तमु संग्रहः
॥१२४॥ हमुस्माआंमुष्यायुणायं । ओजंसेवीर्यायगृह्णामि । अपांयोमंध्यतोरसंः ।
तमुहमुस्माआंमुष्यायुणायं । पुष्ट्यैप्रजनंनायगृह्णामि । अपांयोयुज्ञियोरसंः ।
तमुहमुस्माआंमुष्यायुणायं । आयुंषेदीर्घायुत्वायंगृह्णामि ॥ ७ ॥ गोष्वोजं
स्वंत ॰ श्रीणाम्योजोंसितत्तुंप्रयंच्छामिपयंसासंपिंपृग्धिमासंद्धिभूयंज्ञियोर
सोद्धेच॥ तिष्ठाहरीरथुआयुज्यमांनायाहि । वायुर्ननियुतों नोअच्छं । पिबा
स्यंधोंअभिमृंष्टोअस्मे । इंद्रस्वाहांरारिमातेमदांय । कस्यवृषांसुतेसचां । नि
युत्वांन्वृषभारणत् । वृत्रहासोमंपातिये । इंद्रंवयंमंहाधने । इंद्रमभेंहवामहे ।
यजंवृत्रेषंवाज्रिणं॥ १॥ द्वितायोवृंत्रहंतंमः । विदइंद्रः शतक्रंतुः । उपंनोहरिंभिः ॥१२४॥

सुतं । ससूरआजनयन्ज्योतिरिंद्रं । अयाधियातरणिरद्रिबर्हाः । ऋतेनशुष्मी
नवमानोअर्कैः । व्युस्रियोअस्रो अद्रिर्बिभेद । उतत्यदाश्वाश्व्यं । यदिंद्रनाहु
षीष्वा । अग्रेविक्षुप्रतीदंयत् ॥ २ ॥ भरेष्विंद्रꣳ सुहवꣳ हवामहे । अꣳहो
मुचꣳ सुकृतंदैव्यंजनम् । अग्निंमित्रंवरुणꣳ सातयेभगं । द्यावापृथिवीमरुतः
स्वस्तये । महिक्षेत्रंपुरुश्चंद्रंविविद्वान् । आदित्सखिभ्यश्चरथꣳ समैरत् । इंद्रो
नृभिरजनद्दीद्यानः साकं । सूर्यमुषसंगातुमग्निं । उरुन्नोलोकमनुनेषिविद्वान् ।
सुवर्वज्ज्योतिरभयꣳ स्वस्ति ॥ ३ ॥ ऋष्वातइंद्रस्थविरस्यबाहू । उप
स्थेयामशरणाबृहंता । आनोविश्वाभिरूतिभिःसजोषाः । ब्रह्मजुषाणोहर्य
श्वयाहि ॥ वरीवृजत्स्थविरेभिः सुशिप्र ॥ अस्मेदधद्वृषणꣳ शुष्ममिंद्र ॥

इंद्रांयुगावं आशिरं ॥ दुदुहेवज्रिणेमधुं ॥ यत्सीमुपह्वरेविदत् ॥ तास्तेंवाज्रि
न्धेनवोंजोजयुर्नः ॥ ४ ॥ गभंस्तयोनियुतोंविश्ववांराः । अहंरहर्भूयइज्जो
गुंवानाः । पूर्णाइंद्रक्षुमतोभोजंनस्य । इमांतेधियंप्रभंरेमुहोमुहीं । अस्यस्तोत्रे
धिषणायत्तंआनजे । तमुंत्सुवेचंप्रसुवेचंसासुहिं । इंद्रंदेवासुः शवंसामदुंन्ननुं
॥ ५ ॥ वज्रिणंमयत्स्वस्तिजोंजयुर्नः सुप्तचं । इदंविष्णुर्विचंक्रमइतिव्यं
क्रमत । यस्मांत्पशवः प्रप्रेबभ्र ँ शेरन् । सएतेनंयजेत । यदाप्नोत् । तदस्तो
र्यांमस्यासोयांसुत्वं । एतेनुवैदेवाजैत्वांनिजित्वा। यंकाममकांमयंतुतमांप्नुवन्।
यंकामंकामयंते ॥ तमेतेनांप्नोति । तद्वावांणः सोमसुतोंमयोभुवंः । तदंश्विना
शृणुत ँ सौभगायुवं । अवंतेहेडउदुंत्तमं । एनाव्याघ्रंपरिषस्वजानाः । सि ँ

हꣳ हिन्वंतिमहतेसौभंगाय । समुद्रंनसुहुवंतस्थिवाꣳसंम् । मुर्मृज्यंतेद्वीपिनंमप्स्वंन्तः । उदसावेतुसूर्यः । उदिदंमांमुकंवर्चः । उदिहिदेवसूर्य । सहवुग्नुनामर्मं । अहंवाचोविवाचंनं । मयिवागंस्तुधर्णसिः । यंतुंनदयोवर्षन्तुपर्जन्यांः । सुपिप्पलाओषंधयोभवंतु । अन्नंवतामोदनवंतामामिक्षंवताम् । एषा ꣳ राजांभूयासम् । देहिदाक्षिणांप्रतिरस्थायुः । अथांमुच्यस्ववरुंणस्यपाशांत् । येनावंपत्सवितांक्षुरेणं । सोमंस्यराज्ञोवरुंणस्यविद्वान् । तेनंब्रह्माणोवपतेदमुस्योर्जैमं । रय्यावर्चंसासꣳसृंजाथ । मातेकेशाननुंगाद्वर्चएतत् । तथांधातांकंरोतुते । तुभ्यमिन्द्रोबृहस्पतिः । सवितावर्चआदंधात् । तेभ्योनिधानंबहुधाव्यैच्छंन् । अंतराद्यावांपृथिवीअपः सुवंः । पीवोअन्नाꣳरयिवृधः सुमेधाः ।

श्वेतः सिषक्तिनियुतांमभिश्रीः । तेवायवेसमंनसोवितंस्थुः । विश्वेन्नरः स्वप
त्यानिचक्रुः । रायेनुयंजज्ञतूरोदसीउभे । रायेदेवीधिषणांधातिदेवम् । अधांवा
युंनियुतः सश्चतस्वाः । उतश्वेतंवसुंधितिंनिरेके । आवांयोप्रयाभिः । प्रवायुम
च्छांबृहतीमनीषा ॥ १ ॥ बृहद्रयिंविश्ववारा ँ रथप्रां । द्युतद्यांमानियुतः
पत्यमानः । कविःकविमियक्षसिप्रयज्यो । आनोनियुद्भिः शतिनीभिरध्वरं ।
सहस्रिणीभिरुपयाहियज्ञं । वायोअस्मिन्हविषिमादयस्व । यूयंपात स्वस्ति
भिः सदांनः । प्रजापतेनत्वदेतान्यन्यः । विश्वांजातानिपरिताबभूव । यत्का
मास्तेजुहुमस्तन्नोंअस्तु ॥ २ ॥ वय ँ स्यामपतयोरयीणां । रयीणांपतिंयज
तंबृहंतं । अस्मिन्भरेनृतमंवाजसातौ । प्रजापतिंप्रथमजामृतस्यं । यजामदेव

माधिनोब्रवीतु । प्रजापतेत्वंनिधिपाः पुराणः । देवानांपिताजनिताप्रजानाम् ।
पतिर्विश्वस्यजगतः परस्याः । हविर्नोदेवविहवेजुषस्व । तवेमेलोकाः प्रदिशो
दिशश्च ॥ ३ ॥ परावतोनिवतउद्वतश्च । प्रजापतेविश्वसृज्जीवधन्यइदंनोदेव ।
प्रतिहर्यहव्यम् । प्रजापतिंप्रथमंयज्ञियानाम् । देवानामग्रेयजतंयजध्वम् ।
सनोददातुद्रविणꣳसुवीर्यं । रायस्पोषंविष्यंतुनाभिमस्मे । योरायईशेशतदा
यउक्थ्यः । यः पशूनाꣳरक्षिताविष्ठितानां । प्रजापतिः प्रथमजाऋतस्य ॥ ४ ॥
सहस्रधामाजुषताꣳहविर्नः। सोमापूषणेमौदेवौ । सोमापूषणारजसोविमानम् ।
सप्तचक्रꣳरथमविश्वमिन्वम् । विषूवृतंमनसायुज्यमानम् । तंजिन्वथोवृषणापं
चरश्मिम् । दिव्यन्यःसदनंचक्रउच्चा। पृथिव्यामन्योअध्यंतरिक्षे । तावस्मभ्यं

पुरुवारंपुरुक्षुम् । रायस्पोषंविष्यंतांनाभिमस्मे ।५। धियंपूषाजिन्वतुविश्वमिन्वः ।
रयिꣳ सोमोरयिपतिर्दधातु । अवंतुदेव्यदितिरनर्वा । बृहद्वदेमविदथेसुवीराः ।
विश्वान्यन्योभुवनाजजान । विश्वमन्योअभिचक्षाणएति । सोमापूषणाववतं
धियंमे । युवाभ्यांविश्वाः पृतनाजयेम । उदुत्तमंवरुणास्तभ्नाद्याम् । यत्किंचे
दंकितवासः । अवंतेहेडस्तत्वायामि । आदित्यानामवसानदक्षिणा । धारयं
तआदित्यासस्तिस्रोभूमीर्धारयन् । यज्ञोदेवानाꣳशुचिरपः ॥ ६॥ मनीषास्तु
चुर्तस्यास्मेकितवासंश्चत्वारिंच । तेशुक्रासः शुचयोरश्मिवंतः । सीदन्नादि
त्याअधिबर्हिषिप्रिये । कामेनदेवाः सरथंदिवोनः । आयंतुयज्ञमुपनोजुषाणाः ।
तेसूनवोअदितेः पीवसामिषम् । घृतंपिन्वत्प्रतिहर्यन्नृतेजाः । प्रयज्ञियायजंमा

नाययेमुरे । आदित्याः कामंपितुमंतंमुस्मे आनः । पुत्रा अदितेंर्यातु य
ज्ञम् । आदित्यासः पथिभिर्देवयानैः । अस्मेकमंदाशुषेसन्नमंतां ।
पुरोडाशंघृतवंन्तजुषंताम् । स्कभायतनिर्ऋतिंसेधतामतिं । प्ररश्मिमभियंतं
मानाअमृध्राः । आदित्याः कामप्रयंतांवषट्कृतिं । जुषध्वंन्नोहव्यदातिंय
जत्राः । आदित्यान्कामुमवंसेहुवेम । ये भूतानि जनयंतोवि चिख्युः । सीदंतु
पुत्राअदितेरुपस्थंम् । स्तीर्णंबर्हिर्हविरद्यायदेवाः ॥ २ ॥ स्तीर्णंबर्हिः सीद
तायज्ञेअस्मिन् । ध्राजाः सेधंतो अमतिंदुरेवां । अस्मभ्यं पुत्राअदितेः प्रयंं
सत । आदित्याः कामंहविषोंजुषाणाः । अग्नेनयंसुपथांरायेअस्मान् । विश्वां
निदेववयुनांनिविद्वान् । ययोध्यंस्मज्जुंहुराणमेनः । भूयिष्ठांतेनमंउक्तिंविधेम ।

प्रवंः शुक्रायंभानवेंभरध्वम् । हुव्यंमुतिंचाग्नयेसुपूंतम् ॥ ३ ॥ योदैव्यांनिमानु
षाजुनूंःषि । अंतर्विश्वांनिविद्मनाजिगांति । अच्छागिरोंमुतयोदेवुयंतीः । अ
ग्निंयांतिद्रविणंभिक्षंमाणाः । सुसंदृशंःसुप्रतींकुंःस्वंचंम् । हुव्युवाहंमरतिंमानु
षाणां । अग्नेत्वमुस्मद्युंयोध्यमींवाः । अनंग्नित्राअभ्यंमंतकृष्टिः । पुनंरुस्मभ्यंंः
सुवितायंदेव । क्षांविश्वेंभिरुजरेंभिर्यजत्र ॥४॥ अग्नेत्वंपांरयानव्योअस्मान् ।
स्वस्तिभिरतिंदुर्गाणिविश्वां । पूश्चंपृथ्वीबंहुलानंउुर्वी । भवांतोकायतनंयाय
शंयोः । प्रकांरवोमनुनावच्यमांनाः । देवुद्रीचींनयथदेवुयंतंः । दक्षिणावाड्वाजि
नीप्राच्यैंति । हविर्भरंत्युग्नयेंघृताचीं । इंद्धंनरोंयुजेरथंम् । जुगृभ्णातेदाक्षिणामिं
द्रहस्तंम ॥५ ॥ वुसूयवोंवसुपतेवसूंनाम् । विद्माहित्वागोपंतिंःशूरो गोनांम ।

अस्मभ्यंचित्रंवृषणꣳरयिंदाः । तवेदंविश्वंमभितः पशव्यं । यत्पश्यसिचक्षसा
सूर्यस्य । गवांमसिगोपतिरेकइंद्र । भक्षीमहितेप्रयंतस्यवस्वः । सामिंद्रणोमनं
सानेषिगोभिः । सꣳसूरिभिर्मघवन्तसꣳस्वस्त्या। संब्रह्मणादेवकृतंयदास्ति॥६॥
संदेवानाꣳसुमत्यायज्ञियानाम् । आराच्छत्रुमपबाधस्वदूरम् । उग्रोयः शंवः
पुरुहूततेनं । अस्मेधेहियवमद्गोमदिन्द्र । कृधीधियंजरित्रेवाजरत्नाम् । आवे
धसꣳसहिशुचिः । बृहस्पतिः प्रथमंजायमानः। महोज्योतिषः परमेव्योमन् ।
सप्तास्यस्तुविजातोरवेण । विसप्तरश्मिरधमत्तमाꣳसि॥७॥ बृहस्पतिः समं
जयद्वसूनि । महोव्रजान्गोमतोदेवएषः । अपः सिषासन्त्सुवरप्रतीत्तः । बृहस्प
तिर्हत्यमित्रमर्कैः । बृहस्पतेपर्येवापित्रे । आनोदिवः पावीरवी । इमाजुह्वाना

॥१२९॥ यस्तेस्तनः । सरस्वत्यभिनोनेषि । इयꣳशुष्मेभिर्बिसखाइवारुजत् । सानुंगि
रीणांतविषेभिरूर्मिभिः । पारावतघ्नीमवसेसुवृक्तिभिः । सरस्वतीमाविवासे
मधीतिभिः । देवयानैर्देवाःसुपूतंयजत्रहस्तमास्तितमा ꣳ स्यूर्मिभिर्द्धेचं ॥८॥
सोमोधेनुं ꣳ सोमोअर्वन्तमाशुं । सोमोवीरंकर्मण्यंददातु । सादन्यंविदथ्यंꣳ
सभेयं । पितृश्रवणंयोददाशदस्मै । अषाढंयुत्सुत्व ꣳ सोमक्रतुभिः । याते
धामानिहविषायजंति । त्वमिमाओषधीः सोमविश्वाः । त्वमपोअजनयस्त्वं
गाः । त्वमाततंथोर्वन्तरिक्षं । त्वंज्योतिषावितमोववर्थ ॥ १ ॥ यातेधामानिदि
वियापृथिव्यां । यापर्वतेष्वोषधीष्वप्सु । तेभिर्नोविश्वैः सुमनाअहेडन् । राज ॥१२९॥
न्त्सोमप्रतिहव्यागृभाय । विष्णोर्नुकंतदस्यप्रियं । प्रतद्विष्णुः । परोमात्रया

तनुवांवृधान । नतेंमहित्वमन्वंश्नुवंति । उभेतेंविद्मारजंसीपृथिव्याविष्णों
देवुत्वं । पुरमस्यांवित्से ॥ २ ॥ संचक्षांणोभुवंनादेववईयते । शुचींवोहव्या
मंरुतः शुचींनां । शुची ॅ हिनोम्यध्वुर ॅ शुचिंभ्यः । ऋतेनंसुत्यमृतुसाप
आयन् । शुचिजन्मानः शुचंयः पावुकाः । प्रचित्रमुर्कंगृंणतेतुरायं । मारुंताय
स्वतंवसेभरध्वं । ये सहां ॅ सिसहंसासहंते । रेजंतेअग्नेपृथिवीमुखेभ्यः ।
अ॑ॅ सुष्वामंरुतः खादयोवंः ॥ १ ॥ भगंधियंवाजयंतः पुरंधिं । नराशंॅसो
ग्नास्पतिंर्नोअव्यात् । आयेवामस्यंसंगुथेरंयीणां । प्रियादेवस्यंसवितुः स्यां
म । आनोविश्वेअस्क्रांगमंतुदेवाः । मित्रोअंर्युमावरुंणः सुजोषाः । भुवन्यथां
नोविश्वेवृधासंः । करन्त्सुषाहांविथुरंनशवंः । शंनोंदेवाविश्वदेवाभवंतु । श ॅ

मंत्र- सरंस्वतीसुहधीभिरंस्तु ॥ १ ॥ शमांभिषाचुः शमुंरातिषाचंः । शंनोंदिव्याः संग्रहः
॥१२०॥ पार्थिवाः शंन्नोअप्यांः । येसंवितुः सत्यसंवस्युविश्वें । मित्रस्यंव्रतेवरुंणस्यदे
वाः । त्वेसौभंगंवीरसुंद्रोसुदस्नंः । दधांतनद्रविणंचित्रमुस्मे । अग्नेयाहिदूत्यंवा
रिषेण्यः । देवा ँ अच्छांब्रह्मकृतांगुणेनं । सरंस्वतींमुरुतोंअश्विनापः । यक्षि
देवान्रंत्नधेयांयुविश्वंन् ॥ १ ॥ द्यौः पितः पृथिविमातरध्रुंक् । अग्नेभ्रातर्वसवो
मृडतांनः । विश्वंआदित्याअदितेसजोषांः । अस्मभ्यु ँ शर्मंबहुलंवियंत ।
विश्वेदेवाः शृणुतेम ँ हवंमे । येअंतरिंक्षेयउपद्यविष्ठ । येअंग्निजिह्वाउतवाय
जंत्राः । आसद्यास्मिन्बुर्हिषिमादयध्वं । आवांमित्रावरुणाहव्यजुंष्टिम् । नमं ॥१२०॥
सादेवाववंसावववृत्याम॥ १ ॥अस्माकंब्रह्मपृतंनासुसह्याअस्माकंम् । वृष्टिदिव्या

सुपारा । युवंवस्त्राणिपीवसावंसाथे । युवोरच्छिद्रामंतवोहसर्गाः। अवातिरतमनृतानिविश्वा । ऋतेनमित्रावरुणासचेथे । तत्सुवांमित्रावरुणामहित्वं । ईर्मातस्थुषीरहंभिर्दुदुह्रे । विश्वाः पिन्वथः स्वसंरस्यधेनाः । अनुंवामेकः पविरावंवर्त्ति ॥ १ ॥ अहमस्मिप्रथमजाऋतस्य । पूर्वंदेवेभ्योअमृतस्यनाभिः । योमाददातिसइदेवमावाः । अहमन्नमन्नमदंतमद्मि । पूर्वमग्नेरपिदहत्यन्नं । यत्तौहासातेअहमुत्तरेषु । व्यात्तमस्यपशवःसुजंभं । पश्यंतिधीराःप्रचरंतिपाकाः । जहाम्यन्यंनजहाम्यन्यं । अहमन्नंवशमिच्चरामि ॥ १ ॥ समानमर्थंपर्येमिभुंजत् । कोमामन्नंमनुष्योदयेत । पराकेअन्नंनिहितंलोकएतत् । विश्वैर्देवैः पितृभिर्गुप्तमन्नं । यदद्यतेलुप्यतेयत्परोप्यते । शततमीसातनूमेंबभूव । महां

तौँचुरूंसकृद्दुग्धेनंपप्रौ । दिवंचपृश्निपृथिवींचसाकं । तत्संपिबंतोनमिनंति
वेधसः । नैतद्भूयोभवंतिनोकनीयः ॥ २ ॥ अन्नं प्राणमन्नमपानमाहुः ।
अन्नं मृत्युं तमुंजीवातुमाहुः अन्नं ब्रह्माणोजरसं वदंति । अन्नमाहुः प्रजनं
नंप्रजानां । मोघमन्नंविंदतेअप्रचेताः । सत्यंब्रवीमिवधइत्सतस्य । नार्यमणं
पुष्यंतिनोसखायं । केवलाघोभवतिकेवलादी । अहंमेघस्तनयन्वर्षन्नस्मि ।
मामदंत्यहमद्म्यन्यान् ॥ ३ ॥ अह ँ सदमृतोभवामि । मदादित्याअधिसर्वे
तपंति । देवींवाचमजनयंतयद्वाग्वदंति । अनंतामंतादधिनिर्मितांमहीं । यस्यां
देवाअदधुर्भोजनानि । एकाक्षरांद्विपदा ँ षट्पदां च । वाचं देवाउपजीवंति
विश्वे । वाचंदेवाउपजीवंतिविश्वे । वाचं गंधर्वाः पशवोमनुष्याः । वाचीमाविश्वा

भुवंनान्यर्पिता ॥४॥ सानोहवंजुषतामिंद्रंपत्नी । वागक्षरंप्रथमजाऋतस्यं।वेदा
नांमातामृतंस्यनाभिः।सानोंजुषाणोपंयज्ञमागांत् । अवंतीदेवीसुहवांमेअस्तु ।
यामृषंयोमन्त्रकृतोंमनीषिणंः । अन्वैच्छंन्देवास्तपंसाश्रमेंण । तांदेवींवाचं२
हविषांयजामहे । सानोंदधातुसुकृतस्यंलोके । चत्वारिवाक्परिमितापदानि
॥ ५ ॥ तानिंविदुर्ब्राह्मणायेमंनीषिणंः । गुहात्रीणिनिहितानेंगंयंति । तुरीयं
वाचोमंनुष्यांवदंति । श्रद्धयाग्निः समिंध्यते । श्रद्धयांविंदतेहविः । श्रद्धांभगं
स्यमूर्धनि । वचसावेंदयामसि । प्रियं२ श्रद्धेददंतः । प्रियं२ श्रद्धेदिदांसतः ।
प्रियंभोजेषुयज्वंसु ॥ ६ ॥ इदंमंउदितंकृधि । यथांदेवाअसुरेषु । श्रद्धामुग्रेषुं
चक्रिर । एवं भोजेषुयज्ज्वंसु । अस्माकंमुदितंकृधि । श्रद्धांदेवायजंमानाः ।

वायुर्गोपाउपासते । श्रद्धा ँ हृदय्यंयाकूत्या । श्रद्धयांहूयतेहविः । श्रद्धां प्रात
र्हवामहे ॥ ७ ॥ श्रद्धांमुध्यंदिनंपरि । श्रद्धा ँ सूर्यस्यनिमुचि । श्रद्धेश्रद्धांपयेु
हमां । श्रद्धादेवानधिवस्ते । श्रद्धाविश्वमिदंजगत् । श्रद्धांकामंस्यमा
तरं । हविषांवर्धयामसि । ब्रह्मजज्ञानंप्रथमंपुरस्तात् । विसीमतः सुरुचे
वेनआवः । सबुध्नियाउपमाअस्यविष्ठाः ॥ ८ ॥ सतश्चयोनिमसंतश्चविवः ।
पितविराजामृषभोरयीणां । अंतरिक्षंविश्वरूपआविवेश । तमकैरभ्यर्चं
तिवत्सम् । ब्रह्मसंतंब्रह्मणावर्द्धयंतः ब्रह्मदेवानंजनयत् । ब्रह्मविश्वमिदंजगत् ।
ब्रह्मणःक्षत्रंनिर्मितं । ब्रह्मब्राह्मणआत्मना । अंतरस्मिन्निमेलोकाः ॥ ९ ॥ अं
तर्विश्वमिदंजगत् । ब्रह्मैवभूतानांज्येष्ठं । तेनकोर्हतिस्पर्धितुं । ब्रह्मन्देवास्त्रयं

स्त्रि॒ ॐ शत् । ब्रह्मा॑न्निंद्रप्रजापती । ब्रह्मं॑न्हु विश्वा॑भूतानि॑ । ना॒वीवा॑तः स॒मा
हि॑ता । चतं॑स्रआशा॒ः प्रचरं॑त्वग्नयं॑ः । इ॒मंन्नो॑य॒ज्ञंनंयतुप्रजा॒नन् । घृ॒तंपिन्वं॑
न्नजर॑ं सु॒वीरं॑म् ॥ १० ॥ ब्रह्मंस॒मिद्भ॑वत्याहु॑तीनाम् । आगावो॑अग्मन्नु॒तभ॒द्रमं॑
क्रन् । सीदं॑तु॒गोष्ठे॑र॒णयं॑त्व॒स्मे । प्र॒जावं॑तीःपु॒रुरू॑पाइ॒हस्यु॒ः । इंद्रा॑यपू॒र्वीरु॒षसो॒
दुहा॑नाः । इंद्रो॑यज्व॑नेपृ॒णतेचा॑शिक्षति । उपेद्दं॑दातिनस्वं॑मु॒षायति । भूयो॑भूयो॒
र॒यिमिदं॑स्यव॒र्द्धयं॑न् । अभि॑न्नेखि॒ल्लेनिदं॑धातिदेव॒युं । नता॑नंशंतिनता॒अर्वा॑
॥ ११ ॥ गावो॒भगो॒गाव॒इंद्रो॑मेअच्छात् । गाव॒ः सोमं॑स्यप्रथ॒मस्य॑भक्षः । इमा
यागाव॒ः सजं॑नास॒इंद्रः॑ । इ॒च्छामी॒द्धृदामनं॑सा॒चिदिंद्रं॑म् । यू॒यंगा॑वोमेदयथाकृ॒शं
चि॑त् । अ॒श्लीलं॑चित्कृणुथासु॒प्रती॑कम् । भ॒द्रंगृ॒हंकृ॑णुथभद्रवाचः । बृ॒हद्वो॒वयं॑

उच्यतेसुभासुं । प्रजावंतीः सूयवंस ँ रिशंतीः । शुद्धाअपः सुंप्रपाणेपिबंतीः
मावंःस्तेनईशंतमाघशं ँ सः । परिवोहेतीरुद्रस्यंवृंज्यात् । उपेदमुंपपर्चनम् ।
आसुगोषूपंपृच्यतां । उपंर्षभस्यरेतंसि । उपेंद्रतवंवीर्यें ॥ १२ ॥ चुरामिक
नींयोन्यानर्पितापदानियज्वसुहवामहोविष्ठालोकाः सुवीरमर्वापिबंतीः षट्चं ॥
तासूंर्याचंद्रमसांविश्वभृत्तंमामुहत् । तेजोवसुंमद्राजतोदिवि । सामांत्मानाच
रतः सामचारिणां ॥ ययोर्वृतंनममेजातुंदेवयोंः । उभावंतौपरिंयातुअम्यां ।
दिवोनरश्मी ँ स्तंनुतोव्यंर्णवे । उभाभुंवंतीभुवंनाकविक्रंतू । सूयांनचंद्राचंर
तोहुतामंती । पतीद्युंमाद्विश्वविदांउभादिवः । सूर्यांउभाचंद्रमंसाविचक्षणा॥ १॥
विश्ववांरावरिवोभावरेंण्या । तानोंवतंमतिमंतामहिंव्रता । विश्ववपंरीप्रतरंणा

तरंता । सुवाविंदांदृशयेभूरिरश्मी । सूर्याहिचंद्रावसुंत्वेषदर्शता । मनस्विन्नोभा
नुंचरतोनुसंदिवंम् । अस्यश्रवोनद्यः सप्तबिभ्रति ॥ द्यावाक्षामांपृथिवीदर्शतं
वपुंः । अस्मेसूर्याचंद्रमसाभिचक्षे । श्रद्धेकमिंद्रचरतोविचर्तुरम् ॥ २॥ पूर्वा
परंचरतोमाययैतौ । शिशूक्रीडंतौपरियातोअध्वरम् । विश्वान्यन्योभुवनाभि
चष्टे । ऋतूनन्योविदधंज्जायतेपुनः । हिरण्यवर्णाःशुचंयःपावकायासुजाताः ।
यासांदेवाः शिवेनंमाचक्षुषापश्यत । आपोभद्राआदित्पश्यामि । नासंदा
सीन्नोसदांसीत्तदानीम् । नासीद्रजोनोव्योमापरोयत् । किमावंरीवः कुहकस्य
शर्मन् ॥ ३ ॥ अंभः किमांसीद्गहंनंगभीरम् । नमृत्युरमृतंताहिन । रात्रियाअ
न्हंआसीत्प्रकेतः । आनीदवात ँ स्वधयातदेकंम् । तस्मांद्धान्यन्नपरः किंच

नासं । तमंआसीत्तमंसागूढमग्रेंप्रकेतम् । सलिलꣳसर्वमाइदम् । तुच्छेनाभ्व
पिहितंयदासीत् । तमंसुस्तन्महिनाजायतैकम् । कामस्तदग्रेसमंवर्तताधि
॥ ४ ॥ मनसोरेतः प्रथमंयदासीत् । सतोबंधुमसतिनिरविंदन् । हृदिप्रती
ष्याकवयोमनीषा । तिरश्चीनोविततोरश्मिरेषाम् । अधस्विदासी३ दुपरि
स्विदासी३त् । रेतोधाआंसन्महिमानंआसन् । स्वधाअवस्तात्प्रयतिः पुर
स्तात् । कोअद्धावेदकइहप्रवोचत् । कुतआजाताकुतइयंविसृष्टिः । अर्वाग्देवा
अस्यविसर्जनाय ॥ ५ ॥ अथाकोवेदयतआबभूव । इयंविसृष्टिर्यतआबभूव ।
यदिवादधेयदिवान । योअस्याध्यक्षः परमेव्योमन् । सोअंगवेदयदिवान
वेद । किꣳस्विद्वनंकउसवृक्षआसीत् । यतोद्यावापृथिवीनिष्टतक्षुः । मनीषि

णोमनसापृच्छतेदुतत् । यदध्यतिष्ठद्भुवनानिधारयन् । ब्रह्मवनंब्रह्मसवृक्षआ
सीत् ॥ ६ ॥ यतोद्यावांपृथिवीनिष्टतक्षुः । मनीषिणोमनसाविब्रवीमिवः ।
ब्रह्माध्यतिष्ठद्भुवनानिधारयन् । प्रातरग्निंप्रातरिंद्र ँ हवामहे । प्रातर्मित्रावरु
णाप्रातरश्विना । प्रातर्भगंपूषणंब्रह्मणस्पतिम् । प्रातः सोमंमुतरुद्र ँहुवेम ।
प्रातर्जितंभगमुग्र ँहुवेम । वयंपुत्रमदितेर्योविधर्ता । आध्राश्चिद्यंमन्यमानस्तु
रश्चित्॥७॥ राजाचिद्यंभगंभक्षीत्याह । भगप्रणेतर्भगसत्यराधः । भगेमांधिय
मुदवददन्नः । भगप्रणोजनयगोभिरश्वैः । भगप्रनृभिर्नृवन्तःस्याम । उतेदानीं
भगवन्तःस्याम । उतप्रपित्वउतमध्येअन्हाम् । उतोदितामघवन्त्सूर्यस्य । वयं
देवानाँ सुमतौस्याम । भगएवभगवाँ अस्तुदेवाः ॥ ८ ॥ तेनवयंभगवंतः

स्याम।तंत्वांभगसर्वंइज्जोहवीमि । सनोंभगपुरएताभंवेह। समंध्वरायोषसोंनम
न्त। दधिक्रावेंवशुचंयेपदायं। आवांचीनंवंसुविदंभगंनः। रथंमिवांश्ववाजिनआ
वंहंतु । अश्वांवतीगोंमंतीनंउषासंः । वीरवंतीः सदंमुच्छंतुभद्राः । घृतंदुहांना
विश्वतःप्रपीनांः । यूयंपांतःस्वस्तिभिः सदांनः ॥ ९ ॥ विचक्षणाविंचर्तुरं शमं
न्नाधिंविसर्जंनायब्रह्मवनंब्रह्मसवृक्षआंसीत्तुराश्विंदेवाःप्रपीनाएकंच। हरिःॐ॥७

॥ ब्राह्मणतृतीयाष्टकप्रारंभः ॥

हरिः ॐ॥ अग्निर्नंःपातुकृत्तिकाः । नक्षंत्रंदेवांमिंद्रियम् । इदमांसांविचक्षणम् ।
हविरासंजुंहोतन । यस्यभांतिरश्मयोयस्यंकेतवंः । यस्येमाविश्वाभुवंनानिस
वां । सकृत्तिकाभिरभिसंवसांनः । अग्निर्नोदेवःसुंवितेदंधातु। प्रजापंतेरोहिणीवें

तुपत्नीं । विश्वरूपाबृहतीचित्रभानुः ॥ १ ॥ सानोयज्ञस्यसुवितेदंधातु । यथाजीवे
मशरदः सवीराः । रोहिणीदेव्युदंगात्पुरस्तात् । विश्वारूपाणिप्रतिमोदमाना ।
प्रजापति ँ हविषांवर्द्धयंती । प्रियादेवानामुपयातुयज्ञम् । सोमोराजामृगशी
र्षेणआगन् । शिवंनक्षत्रंप्रियमंस्यधाम । आप्यायमानोबहुधाजनेषु । रेतः
प्रजांयजमानेदधातु ॥ २ ॥ यत्तेनक्षत्रंमृगशीर्षमस्ति । प्रिय ँ राजन्प्रियतमंप्रि
याणां । तस्मैतेसोमहविषाविधेम । शंनएधिद्विपदेशंचतुष्पदे । आर्द्रयारुद्रःप्रथ
मानएति । श्रेष्ठोदेवानांपतिरघ्नियानाम् । नक्षत्रमस्यहविषाविधेम । मानः
प्रजा ँरीरिषन्मोतवीरान् । हेतीरुद्रस्यपरिणोवृणक्तु । आर्द्रानक्षत्रंजुषता ँ ह
विर्नः ॥ ३ ॥ प्रमुंचमानौदुरितानिविश्वा । अपाघश ँ सन्नुदतामरातिम् । पुनर्नोदे

व्यदितिस्टृणोतु । पुनर्वसूनुःपुनरतोंयज्ञम् । पुनर्नोदेवाअभियंतुसर्वे । पुनःपुन
र्वोहविषां यजामः । एवानदेव्यदितिरनुर्वा । विश्वस्यभर्त्रीजगतःप्रतिष्ठा । पुनं
र्वसूहविषांवर्द्धयंती । प्रियंदेवानामप्येतुपाथः ॥ ४ ॥ बृहस्पतिःप्रथमंजायमानः ।
तिष्यंनक्षत्रमभिसंबभूव । श्रेष्ठोदेवानांपृतंनासुजिष्णुः । दिशोनुसर्वाअभयं
नोअस्तु । तिष्यःपुरस्तादुतमध्यतोनः । बृहस्पतिर्नः परिपातुपश्चात् । बाधें
तांद्वेषोअभयंकृणुतां । सुवीर्यस्यपतयःस्याम । इदᳪंसर्पेभ्योहविरस्तुजुष्टम् ।
आश्रेषायेषामनुयंतिचेतः ॥ ५ ॥ येअंतरिक्षंपृथिवींक्षियंति । तेनःसर्पासोह
वमागमिष्ठाः । येरोचनेसूर्यस्यापिसर्पाः । येदिवंदेवीमनुसंचरंति । येषामाश्रे
षाअनुयंतिकामम् । तेभ्यःसर्पेभ्योमधुमज्जुहोमि । उपहूताःपितरोयेमघासु ।

मनोजवसः सुकृतः सुकृत्याः । तेनोनक्षत्रेहवमागमिष्ठाः । स्वधाभिर्यज्ञंप्रयतं
जुषंताम् ॥ ६ ॥ येअग्निदग्धायेनग्निदग्धाः । येमुंलोकंपितरःक्षियंति । याश्चं
विद्मयाउंचनप्रविद्म । मघासुयज्ञंसुकृतंजुषंताम् । गवांपतिःफल्गुनीनामसि
त्वं । तदर्यमन्वरुणमित्रचारु । तंत्वांवयंसनितारंसनीनां । जीवाजीवंतमुप
संविशेम । येनेमाविश्वाभुवनानिसंजिता । यस्यदेवाअनुसंयंतिचेतः ॥ ७ ॥
अर्यमाराजाजरस्तुविष्मान् । फल्गुनीनामृषभोरोरवीति । श्रेष्ठोदेवानांभगवो
भगासि । तत्त्वांविदुःफल्गुनीस्तस्यवित्तात् । अस्मभ्यंक्षत्रमजरंसुवीर्यम् ।
गोमदश्ववदुपसन्नुदेह । भगोहदाताभगइत्प्रदाता । भगोदेवीःफल्गुनीराविवेश ।
भगस्येत्तंप्रसवंगमेम । यत्रदेवैःसधमादंमदेम ॥ ८ ॥ आयातुदेवःसवितोपयातु ।

हिरण्ययेनसुवृतारथेन । वहन्हस्तं ꣳसुभगंविद्मनायंसम् । प्रयच्छंतंपपुरिंपुण्य
मच्छं । हस्तःप्रयंच्छत्वमृतंवसीयः। दक्षिणेनप्रतिगृभ्णीमएनत् । दातारंमद्य
संविताविदेय । योनोहस्तांयप्रसुवातियज्ञम् । त्वष्टानक्षंत्रमभ्येतिचित्राम् ।
सुभ ꣳ संसंयुवति ꣳ रोचंमानाम् ॥ ९ ॥ निवेशयन्नमृतान्मर्त्या ꣳ श्च । रूपा
णिपि ꣳ शन्भुवंनानिविश्वां । तंनस्त्वष्टातदुचित्राविचंष्टां । तन्नक्षंत्रंभूरिदाअं
स्तुमह्यं । तन्नंः प्रजांवीरवंती ꣳ सनोतु । गोभिर्नोअश्वैः समंनक्तुयज्ञं । वायुर्न
क्षंत्रमभ्येतिनिष्ट्यांम् । तिग्मशृंङ्गोवृषभोरोरुंवाणः। समीरयन्भुवंनामातरिश्वां
अपद्वेषा ꣳ सिनुदतामरांतीः ॥१०॥ तन्नोवायुस्तदुनिष्ट्यांशृणोतु । तन्नक्षंत्रं
भूरिदाअंस्तुमह्यम्। तन्नोदेवासोअनुंजानंतुकामंम्। यथातरेमदुरितानिविश्वां ।

दूरमुस्मच्छत्रवोयंतुभीताः। तदिन्द्राग्नीकृंणुतांतद्विशांखे। तन्नोंदेवा अनुंमदंतु
युज्ञम्। पुश्चात्पुरस्तादभंयन्नोअस्तु। नक्षंत्राणामधिंपत्नीविशांखे। श्रेष्ठांविंद्रा
ग्नीभुवंनस्यगोपौ ॥११॥ विषूंचःशत्रूंनपुबाधंमानौ। अपुक्षुधंं नुदतामरांतिम्।
पूर्णापुश्चादुतपूर्णापुरस्तात्। उन्मंध्यतः पौर्णमासीजिंगाय। तस्यांदेवा
अधिंसुंवसंतः। उत्तमेनाकंइहमांदयंतां। पृथ्वीसुवर्चांयुवतिःसुजोषाः। पौर्ण
मास्युदंगाच्छोभंमाना। आप्याययंतीदुरितानिविश्वां। उरुंदुहांयजंमानाययु
ज्ञम् ॥ १२॥ चित्रभांनुर्यंजमानेदधातुहविर्भिः। पाथश्चेतोंजुषंतांचेतोंमदेम्रोचं
मानामरांतीर्गोपायेयज्ञं ॥ १ ॥ ऋध्यास्मंहव्यैर्नमंसोपुसद्यं। मित्रंदेवंमित्रधेयं
नोअस्तु। अनूराधान्हविषांवर्धयंन्तः। शतंजीवेमशरदःसवीराः। चित्रंनक्षत्र

मुदंगात्पुरस्तांत् । अनूराधासइतियद्वदन्ति। तन्मित्रएंतिपथिभिर्देवयानैः।हिर
ण्ययैर्वितंतैरंतरिक्षे । इंद्रोज्येष्ठामनुनक्षत्रमेति । यस्मिन्वृत्रंवृत्रतूर्येततारं ॥ १ ॥
तस्मिन्वयममृतंदुहांनाः । क्षुधंन्तरेमदुरितिंदुरिष्टिं । पुरंदरायवृषभायधृष्णवे ।
अषाढायसहंमानायमीढुषें । इंद्रायज्येष्ठामधुंमद्दुहानां । उरुंकृणोतुयजंमा
नायलोकम् । मूलंप्रजांवीरवंतींविदेय । परांच्येतुनिर्ऋतिः पराचा । गोभिर्न
क्षत्रंपशुभिः समंक्तं । अहंर्भूयाद्यजंमानायमह्यंम् ॥ २ ॥ अहंनोअद्यसुविते
दंधातु । मूलंनक्षत्रमितियद्वदंति । परांचींवाचानिर्ऋतिंनुदामि । शिवंप्रजायै
शिवमंस्तुमह्यंम् । यादिव्याआपः पयंसासंबभूवुः । याअंतरिक्षउतपार्थिवी
र्याः। यासांमषाढाअंनुयंतिकामंम् । तानआपःशंस्योनाभंवंतु । याश्चकूप्या

॥१३८॥

याश्चनाद्याःसमुद्रियाः । याश्चवैशन्तीरुतप्रासचीर्याः ॥ ३ ॥ यासांमषाढा
मधुंभक्षयंति । तानआपःशंस्योनाभवंतु । तन्नोविश्वेउपंशृण्वंतुदेवाः । तदषा
ढाअभिसंयंतुयज्ञं । तन्नक्षंत्रंप्रथतांपशुभ्यः । कृषिर्वृष्टिर्यजंमानायकल्पताम् ।
शुभ्राः कन्यायुवतयः सुपेशसः । कर्मकृतः सुकृतोवीर्यावतीः । विश्वान्दे
वान्हविषावर्धयंतीः । अषाढाः काममुपंयांतुयज्ञम् ॥ ४ ॥ यस्मिन्ब्रह्माभ्यज
यत्सर्वमेतत् । अमुंचलोकमिदमूंचसर्वम् । तन्नोनक्षत्रमभिजिद्विजित्य । श्रियं
दधात्वहृणीयमानम् । उभौलोकौब्रह्मणासंजितेमौ । तन्नोनक्षत्रमभिजिद्विचं
ष्टाम् । तस्मिन्वयंपृतनाःसंजयेम । तन्नोदेवासोअनुजानंतुकामम् । शृण्वंति
श्रोणाममृतस्यगोपां । पुण्यामस्याउपंशृणोमिवाचम् ॥ ५ ॥ महींदेवींविष्णुप

त्नीमजूर्याम् । प्रतीचींमेना ꣳ हविषांयजामः । त्रेधाविष्णुंरुरुगायोविचंक्रमे
महींदिवंपृथिवीमुंतरिंक्षम् । तच्छ्रोणैतिश्रवंइच्छमांना । पुण्यꣳश्लोकुंयजंमाना
यकृण्वती । अष्टौदेवावसंवः सोम्यासंः । चतंस्रोदेवीरजराःश्रविष्ठाः । तेयज्ञं
पांतुरंजंसः पुरस्तांत् । संवत्सरीणंममृतꣳ स्वस्ति ॥ ६॥ यज्ञंनंः पांतुवसंवः
पुरस्तांत् । दक्षिणतोंभियंतुश्रविष्ठाः । पुण्यंनक्षंत्रमभिसंविंशाम । मानोअरां
तिरघशꣳ सागन् । क्षत्रस्यराजावरुंणोधिराजः । नक्षंत्राणाꣳ शतभिंषग्व
सिष्ठः । तौदेवेभ्यः कृणुतोदीर्घमायुंः । शतꣳ सहस्राभेषजानिंधत्तः । यज्ञंनो
राजावरुंणउपंयातु । तन्नोविश्वेंअभिसंयंन्तुदेवाः ॥ ७ ॥ तन्नोनक्षंत्रꣳ शताभि
षक्जुषाणम् । दीर्घमायुः प्रतिंरद्भेषजानिं । अजएकंपादुदंगात्पुरस्तांत् ।

षकृजुषाणम् । दीर्घमायुः प्रतिरद्भेषजानि । अजएकपादुदगात्पुरस्तात् ।
विश्वांभूतानिप्रतिमोदमानः । तस्यदेवाः प्रसवंयन्तिसर्वे । प्रोष्ठपदासोअमृतं
स्यगोपाः । विभ्राजमानः समिधानउग्रः । आंतरिक्षमरुहद्गंद्यां । तꣳसूर्यं
देवमजमेकंपादम् । प्रोष्ठपदासोअनुयंतिसर्वे ॥ ८ ॥ अहिर्बुध्नियः प्रथमान
एति । श्रेष्ठोदेवानांमुतमानुषाणाम् । तंब्राह्मणाःसोमपाःसोम्यासः । प्रोष्ठप
दासोअभिरक्षंतिसर्वे । चत्वारएकमभिकर्मदेवाः । प्रोष्ठपदासइतियान्वदंति ।
तेबुध्नियंपरिषद्यꣳस्तुवंतः। अहिꣳरक्षंतिनमसोपसद्यं । पूषारेवत्यन्वेतिपंथाम् ।
पुष्टिपतीपशुपावाजंबस्त्यौ ॥ ९॥ इमानिहव्याप्रयंताजुषाणा । सुगैर्नोयानैरुपं
यातांयज्ञम् । क्षुद्रान्पशून्रक्षतुरेवतीनः । गावोनोअश्वाꣳअन्वेतुपूषा । अन्नꣳ
रक्षंतौबहुधाविरूपम् । वाजꣳसनुतांयजमानाययज्ञम् । तदाश्विनावश्वयुजोपं

यातां । शुभंगमिष्ठौसुयमेभिरश्वैः । स्वन्नक्षत्र ँ हविषायजंतौ । मध्वासंपृक्तौ
यजुषासमक्तौ ॥ १० ॥ यौदेवानांभिषजौहव्यवाहौ । विश्वस्यदूतावमृतस्य
गोपौ । तौनक्षत्रंजुजुषाणोपयाताम् । नमोश्विभ्यांकृणुमोश्वयुग्भ्याम्। अपपा
प्मानंभरणीर्भरंतु । तद्यमोराजाभगवान्विचष्टां । लोकस्यराजामहतोमहान्हि।
सुगंनःपंथामभयंकृणोतु । यस्मिन्नक्षत्रेयमएतिराजा । यस्मिन्नेनमभ्यषिंचंतदे
वाः । तदस्यचित्र ँ हविषायजाम । अपपाप्मानंभरणीर्भरंतु । निवेशनीयत्ते
देवाअदधुः ॥ ११ ॥ ततारमहंप्रासचीर्यायांतुयज्ञंवाचं ँ स्वास्तिदेवाअनुयंतिसर्वे
वाजंबःस्त्यौसमक्तौदेवास्त्रीणिच ॥ २ ॥ नवोनवोभवतिजायमानोयमादित्याअं ँ
शमाप्यायंयंति । येविरूपेसमनसा संव्ययंती । समानंतंतुंपरितातनाते ।

विभूप्रभूअनुभूविश्वतोहुवे । तेनोनक्षत्रेहवमागमेतम् । वयंदेवीब्रह्मणासंवि
दानाः । सुरत्नासोदेववीतिंदधानाः । अहोरात्रेहाविषावर्धयंतः । अतिपाप्मानम
तिमुक्त्यागमेम । प्रत्यवदृश्यायती ॥ १ ॥ व्युच्छंतीदुहितादिवः । अपोमहीवृ
णुतेचक्षुषा । तमोज्योतिष्कृणोतिसूनरी । उदुस्रियाः सचतेसूर्यः । सचाउद्य
न्नक्षत्रमर्चिमत् । तवेदुषोव्युषिसूर्यस्यच । संभक्तेनगमेमहि । तन्नोनक्षत्रमार्चि
मत् । भानुमत्तेजउच्चरत् । उपयज्ञमिहागमत् ॥ २ ॥ प्रनक्षत्रायदेवाय ।
इंद्रायेंदु ँ हवामहे । सनः सवितासुवत्सनिं पुष्टिदांवीरवत्तमम् । उदुत्यंचित्रं
अदितिर्नउरुष्यतुमहीमूषुमातरं । इदंविष्णुः प्रतद्विष्णुः । अग्निर्मूर्धाभुवः ।
अनुनोद्यानुमतिरन्विदनुमतेत्वंहव्यवाह ँ स्विष्टं ॥ ३ ॥ आयत्यंगमतिस्व

ष्टं ॥३॥ अग्निर्वाअंकामयता । अन्नादोदेवानां॑ स्यामिति । सएतमग्नयेकृत्ति
काभ्यः पुरोडाशंमष्टाकपालंनिरवपत् । ततोवैसोन्नादोदेवानामभवत् । अग्नि
र्वैदेवानामन्नादः । यथांहवाअग्निर्देवानामन्नादः । एवं॑हवाएषमनुष्याणांभवति
यएतेनहविषायजंते । यउचैनदेवंवेद । सोत्रजुहोति । अग्नयेस्वाहाकृत्तिकाभ्यः
स्वाहा । अंबायैस्वाहादुलायैस्वाहा । नितत्न्यैस्वाहाभ्रयंत्यैस्वाहा । मेघयंत्यै
स्वाहावर्षयंत्यैस्वाहा । चुपुणीकायैस्वाहेति ॥ १ ॥ प्रजापतिः प्रजाअसृजत ।
ताअस्मात्सृष्टाः परांचीरायन् । तासां॑ रोहिणीमभ्यध्यायत् । सोकामयत ।
उपमावर्तेत । समेनयागच्छेयेति । सएतंप्रजापतयेरोहिण्यैचरुंनिरवपत् । ततो
वैसातमपावर्तत । समेनयागच्छत । उपहवाएनंप्रियमावर्तते । संप्रियेणगच्छते ।

यएतेनंहविषायजंते। यउंचैनदेवंवेदं। सोत्रंजुहोति। प्रजापतयेस्वाहांरोहिण्यै
स्वाहां। रोचमानायैस्वाहांप्रजाभ्युःस्वाहेति॥२॥ सोमोवाअंकामयत। ओषं
धीनांराज्यमभिजयेयामिति। सएतंसोमांयमृगशीर्षायंश्यामाकंचरुंपयांसि
निरंवपत्। ततोवैसओषंधीनांराज्यमुभ्यंजयत्। समानानांहवैराज्यमभि
जंयति। यएतेनंहविषायजंते। यउंचैनदेवंवेदं। सोत्रजुहोति। सोमांयस्वाहां
मृगशीर्षांयस्वाहां। इन्वकाभ्युःस्वाहौषंधीभ्युःस्वाहा। राज्यायस्वाहाभिजित्यै
स्वाहेति॥ ३ ॥ रुद्रोवाअंकामयत। पशुमान्त्स्यामिति। सएतंरुद्रायार्द्रा
यैप्रैय्यंगवंचरुंपयांसिनिरंवपत्। ततोवैसपशुमानंभवत्। पशुमान्हवैभंवति। य
एतेनंहविषायजंते। यउंचैनदेवंवेदं। सोत्रंजुहोति। रुद्रायस्वाहार्द्रायैस्वाहां।

पिन्वंमानायैस्वाहांपशुभ्यः स्वाहेतिं ॥ ४ ॥ ऋक्षावाइयमंलोमकांसीत् । सा
कांमयत । ओषंधीभिर्वनस्पतिंभिः प्रजांयेयेतिं । सैतमादित्यैपुनंर्वसुभ्यांचरुं
निरंवपत् । ततोवाइयमोषंधीभिर्वनस्पतिंभिः प्राजांयत । प्रजांयतेहवैप्रजयां
पशुभिः । यएतेनंहविषायजंते । यउंचैनदेवंवेदं । सोत्रंजुहोति । आदित्यैस्वा
हापुनंर्वसुभ्यां । स्वाहाभूत्यैस्वाहाप्रजांत्यैस्वाहेतिं ॥ ५॥ बृहस्पतिर्वाअंकाम
यत । ब्रह्मवर्चसीस्यामितिं । सएतंबृहस्पतंयेतिष्यांयनैवारंचरुंपयंसिनिरंवप
त् । ततोवैसब्रह्मवर्चस्यंभवत् । ब्रह्मवर्चसीहवैभंवति । यएतेनंहविषायजंते ।
यउंचैनदेवंवेदं । सोत्रंजुहोति । बृहस्पतंयेस्वाहांतिष्यांयस्वाहां । ब्रह्मवर्चसाय
स्वाहेतिं ॥ ६ ॥ देवासुराः संयंत्ताआसन् । तेदेवाःसर्पेभ्यंआश्रेषाभ्यआज्यें

करंभंनिरंवपन् । तानेताभिरेवदेवताभिरुपानयन् । एताभिर्हवैदेवताभिर्द्विषं
तंभ्रातृंव्यमुपंनयति । यएतेनंहविषायजंते । यउंचैनदेववंवेदं । सोत्रंजुहोति ।
सर्पेभ्यः स्वाहाश्रेषाभ्यः स्वाहा । दंदशूकेभ्यः स्वाहेति ॥ ७॥ पितरोवा
अंकामयंत । पितृलोकमृध्नुयामेति । तएतंपितृभ्योमघाभ्यः पुरोडाशꣳ षट्
कंपालंनिरंवपन् । ततोवैतेपितृलोकआर्ध्नुवन् । पितृलोकेहवाऋध्नोति । यएते
नंहविषायजंते । यउंचैनदेवंवेदं । सोत्रंजुहोति । पितृभ्यः स्वाहामघाभ्यः ।
स्वाहानघाभ्यःस्वाहा गदाभ्यः स्वाहारुंधतीभ्यः स्वाहेति ॥८॥ अर्यमावाअ
कामयत । पशुमान्त्स्यामिति । सएतमर्यम्णेफल्गुनीभ्यांचरुंनिरंवपत् । ततो
वैसपंशुमानंहभवत् । पशुमान्हवैभंवति । यएतेनंहविषायजंते । यउचैनदेवंवेदं ।

मंत्र-

॥१४३॥

सोत्रंजुहोति । अर्यम्णेस्वाहाफल्गुंनीभ्या ँ स्वाहा पशुभ्युः स्वाहेति ॥ ९ ॥
भगोवाअंकामयत । भगीश्रेष्ठीदेवाना ँ स्यामिति । सएतंभगांयुफल्गुंनी
भ्यांचुरुंनिरंवपत् । ततोवैसभगीश्रेष्ठीदेवानांमभवत् । भगीहवैश्रेष्ठीसंमानानां
भवति । यएतेनंहविषायजंते । यउंचैनदेवंवेदं । सोत्रंजुहोति । भगांयुस्वा
हाफल्गुंनीभ्या ँ स्वाहा । श्रैष्ठ्यांयुस्वाहेति ॥ १० ॥ सवितावाअंकामयत ।
श्रन्मेदेवादधीरन् । सवितास्यामिति । सएत ँ सवित्रेहस्तांयपुरोडाशुंद्वादं
शकपालुंनिरंवपदाशूनांव्रीहीणाम् । ततोवैतस्मैश्रद्देवाअदंधत । सवितांभवत् ।
श्रद्धवाअंस्मैमनुष्यांदधते । सवितासंमानानांभवति । यएतेनंहविषायजंते ।
यउंचैनदेवंवेदं । सोत्रंजुहोति । सवित्रेस्वाहांहस्तांय । स्वाहांददतेस्वाहांपृणते ।

संग्रहः

॥१४३॥

स्वाहा॑प्र॒यच्छ॑तेस्वाहा॑प्रतिगृ॒भ्णतेस्वाहेति॑ ॥ ११॥ त्वष्टा॒वाअ॑कामयतचि॒त्रंप्र॒जां
वि॑न्दे॒येति॑ । सए॒तंत्वष्ट्रे॑चि॒त्रायै॑पुरो॒डाश॑म॒ष्टाक॑पालं॒निर॑वपत् । त॒तो॒वै॒सचि॒त्रं
प्र॒जाम॑विन्दत । चि॒त्रꣳ॑हवै॒प्र॒जां॑विन्दते । यए॒तेन॑ह॒विषा॒यज॑ते । यउ॑चैनदे॒वं॑वेद॑ ।
सो॒त्रंजु॑होति । त्वष्टे॒स्वाहा॑चि॒त्रायै॑स्वाहा॑ । चैत्रा॑य॒स्वाहा॑प्र॒जायै॒स्वाहेति॑ ॥ १२ ॥
वा॒युर्वाअ॑कामयत । का॒म॒चा॒रमे॒षुलो॒केष्व॒भिज॑येयमिति॑ । सए॒तद्वा॒यवे॒निष्ट्या॑
यैगृ॒ष्टचै॒दु॒ग्धंपयो॒निर॑वपत् । त॒तो॒वैसका॑म॒चा॒रमे॒षुलो॒केष्व॒भ्यज॑यत् । का॒म॒चा
रꣳ॑हवाए॒षुलो॒केष्व॒भिज॑यति । यए॒तेन॑ह॒विषा॒यज॑ते । यउ॑चैनदे॒वं॑वेद॑ । सो॒त्रंजु
होति । वा॒यवे॒स्वाहा॒निष्ट्या॑यै॒स्वाहा॑ । का॒म॒चा॒राय॒स्वाहा॒भिजि॑त्यै॒स्वाहेति॑ ।
॥१३॥ इ॒न्द्रा॒ग्नीवाअ॑कामयेताम् । श्रैष्ठ्यं॑दे॒वाना॑म॒भिज॑येवेति॑ । ता॒वे॒तमि॑न्द्रा॒ग्नि

भ्यांविशांखाभ्यांपुरोडाशमेकादशकपालंनिरवपताम् । ततोवैतौश्रैष्ठ्यंदेवा
नामभ्यजयतां । श्रैष्ठ्यं ँ हवैसमानानामभिजयति । यएतेनहविषायजते ।
यउचैनदेवंवेद । सोत्रजुहोति । इंद्राग्निभ्या ँस्वाहाविशांखाभ्या ँस्वाहा । श्रै
ष्ठ्यायस्वाहाभिजित्यैस्वाहेति ॥ १४ ॥ अथैतत्पौर्णमास्याआज्यंनिर्वपति ।
कामोवैपौर्णमासी । कामआज्यं । कामेनैवकाम ँ समर्धयति । क्षिप्रमेन ँ
सकामउपनमति । येनकामेनयजते । सोत्रजुहोति । पौर्णमास्यैस्वाहाकामा
यस्वाहागत्यैस्वाहेति ॥ १५ ॥ मित्रोवाअकामयत । मित्रधेयमेषुलोकेष्वभि
जयेयमिति । सएतंमित्रायानूराधेभ्यश्चरुंनिरवपत् । ततोवैसमित्रधेयमेषुलो
केष्वभ्यजयत् । मित्रधेय ँहवाएषुलोकेष्वभिजयति । यएतेनहविषायजते ।

यउंचैनदेवंवेद । सोत्रंजुहोति । मित्रायस्वाहानूराधेभ्यः स्वाहा । मित्रधेयां
यस्वाहाभिजित्यैस्वाहेति ॥ १ ॥ इंद्रोवाअंकामयत । ज्यैष्ठ्यंदेवानांमभिजंयेय
मिति । सएतमिंद्रायज्येष्ठायैपुरोडाशमेकादशकपालंनिरवपन्महाव्रीहीणाम्
ततोवैसज्यैष्ठ्यंदेवानांमभ्यजयत् । ज्यैष्ठ्यँहवैसंमानानांमभिजंयति । यएते
नंहविषायजंते । यउंचैनदेवंवेद । सोत्रंजुहोति । इंद्रायस्वाहाज्येष्ठायैस्वाहाज्यै
ष्ठायं । स्वाहाभिजित्यैस्वाहेति ॥ २ ॥ प्रजापतिर्वाअंकामयत । मूलंप्रजांविंदे
येति सएतंप्रजापतयेमूलायचरुंनिरवपत् । ततोवैसमूलंप्रजामविंदत । मूलँ
हवैप्रजांविंदते । यएतेनंहविषायजंते । यउंचैनदेवंवेद । सोत्रंजुहोति । प्रजाप
तयेस्वाहामूलायस्वाहा । प्रजायैस्वाहेति ॥ ३ ॥ आपोवाअंकामयंत । समुद्रं

कामंमभिजयेमेति। ताएतमद्भ्योषाढाभ्यंश्चरुंनिरवपन्। ततोवैताः समुद्रंका
मंमभ्यंजयन्। समुद्र॰ हवैकामंमभिजंयति। यएतेनंहविषायजंते। यंउचैन
देवंवेद। सोत्रंजुहोति। अद्भ्यः स्वाहाषाढाभ्यः स्वाहा। समुद्रायस्वाहा
कामायस्वाहा। अभिजित्यैस्वाहेति ॥ ४ ॥ विश्वेवैदेवाअंकामयंत। अनप
जय्यंजंयेमेति। तएतंविश्वेभ्योदेवेभ्योषाढाभ्यंश्चरुंनिरवपन्। ततोवैतेऽनपज
य्यमंजयन्। अनपजय्य॰ हवैजंयति। यएतेनंहविषायजंते। यउंचैनदेवं
वेद। सोत्रंजुहोति। विश्वेभ्योदेवेभ्यः स्वाहाषाढाभ्यः स्वाहा। अनपजय्या
यस्वाहाजित्यैस्वाहेति ॥ ५ ॥ ब्रह्मवाअंकामयत। ब्रह्मलोकमभिजंयेयमिति
तदेतंब्रह्मणेभिजितेचरुंनिरवपत्। ततोवैतद्ब्रह्मलोकमभ्यंजयत। ब्रह्मलोक॰

हुवा अभिजंयाति । यएतेनंहुविषायजंते । यउंचैनदेवंवेद । सोत्रंजुहोति ।
ब्रह्मणेस्वाहांभिजितेस्वाहां । ब्रह्मलोकायस्वाहाभिजित्यैस्वाहेति ॥ ६ ॥
विष्णुर्वाअंकामयत । पुण्यꣳश्लोकꣳशृण्वीय । नमांपापीकीर्तिरागच्छेदिति ।
सएतंविष्णंवेश्रोणायैपुरोडाशंत्रिकपालंनिरंवपत् । ततोवैसपुण्यꣳश्लोकंम
शृणुत । नैनंपापीकीर्तिरागच्छत् । पुण्यꣳहवैलोकꣳशृणुतेनैनंपापीकी
र्तिरागंच्छति । यएतेनंहविषायजंते । यउंचैनदेवंवेद । सोत्रंजुहोति । विष्णं
वेस्वाहांश्रोणायैस्वाहां । श्लोकांयस्वाहांश्रुतायस्वाहेति ॥ ७ ॥ वसंवोवाअंका
मयंत । अग्रंदेवतानांपरीयामेति । तएतंवसुंभ्यः श्रविष्ठाभ्यः पुरोडाश
मष्टाकंपालंनिरंवपन् । ततोवैतेअग्रंदेवतानांपर्यायन् । अग्रꣳहवैसंमानानांप

यैंति । यएतेनंहुविषायजंते । यउंचैनदेवंवेदं । सोत्रंजुहोति । वसुंभ्यः स्वाहा
श्रविंष्ठाभ्यःस्वाहां । अग्रांयुस्वाहापरींत्यैस्वाहेतिं ॥ ८ ॥ इंद्रोवाअंकामयत ।
हृढोशिथिलस्यामितिं । सएतंवरुंणायशतांभिंषजेभेषुजेभ्यंःपुरोडाशंदशंकपालं
निरंवपत्कृष्णानांव्रीहीणाम् । ततोवैसहृढोशिंथिलोभवत् । हृढोहवाअशिंथिलो
भवति । यएतेनंहुविषायजंते । यउंचैनदेवंवेदं । सोत्रंजुहोति । वरुंणायस्वाहां
शतभिषजेस्वाहां । भेषुजेभ्यःस्वाहेतिं ॥ ९ ॥ अजोवाएकंपादकामयत । तेज
स्वीब्रंह्मवर्चसीस्यामिति । सएतमजायैकंपदेप्रोष्ठपदेभ्यश्चरुंनिरंवपत् । ततो
वैसतेंजस्वीब्रंह्मवर्चस्यभवत् । तेजस्वीहवैब्रंह्मवर्चसीभंवति । यएतेनंहविषाय
जंते । यउंचैनदेवंवेदं । सोत्रंजुहोति । अजायैकंपदेस्वाहांप्रोष्ठपदेभ्यःस्वाहां ।

तेजमेस्वाहाब्रह्मवर्चसायस्वाहेति ॥१०॥ अहिर्वैबुध्नियोकामयत । इमांप्रतिष्ठां
विंदेयेति । सएतमहयेबुध्नियायप्रोष्ठपदेभ्यःपुरोडाशंभूमिकपालंनिरवपत् ।
ततोवैसइमांप्रतिष्ठामविंदत । इमाँ हवैप्रतिष्ठांविंदते । यएतेनहविषायजंते ।
यउचैनदेवंवेद । सोत्रजुहोति । अहयेबुध्नियायस्वाहा प्रोष्ठपदेभ्यःस्वाहा । प्रति
ष्ठायैस्वाहेति ॥११॥ पूषावाअकामयत । पशुमान्त्स्यामिति । सएतंपूष्णेरेव
त्यैचरुंनिरवपत् । ततोवैसपशुमानभवत् । पशुमान्हवैभवति । यएतेनहविषा
यजंते । यउचैनदेवंवेद । सोत्रजुहोति । पूष्णेस्वाहारेवत्यैस्वाहा । पशुभ्यःस्वा
हेति ॥१२॥ अश्विनौवाअकामयेतां । श्रोत्रस्विनावबधिरौस्यावेति । तावेतम
श्विभ्यामश्वयुग्भ्यांपुरोडाशंद्विकपालंनिरवपताम् । ततोवैतौश्रोत्रस्विनावबधि

मंत्र- रावभवतां। श्रोत्रस्वीहवाअबधिरोभवति। यएतेनंहविषायजंते। यउचैनदेवं संग्रहः

॥१४७॥ वेदं। सोत्रंजुहोति। अश्विभ्याᳪस्वाहांश्वयुग्भ्याᳪस्वाहां। श्रोत्रायस्वाहाश्रुत्यै

स्वाहेति॥ १३॥ यमोवाअकामयत। पितॄणाᳪ राज्यमभिजयेयमिति।

सएतंयमायापभरणीभ्यश्चरुं निरवपत्। ततोवैसपितॄणाᳪ राज्यमभ्यजय

त्। समानानांᳪ हवै राज्यमभिजयति। यएतेनंहविषायजंते। यउचैनदेवं

वेदं। सोत्रंजुहोति। यमायस्वाहापभरणीभ्यः स्वाहा। राज्यायस्वाहाभिजि

त्यैस्वाहेति॥ १४॥ अथैतदमावास्यायाआज्यंनिर्वपति। कामोवाअमावा

स्यां। कामआज्यं। कामेनैवकामᳪ समर्धयति। क्षिप्रमेनᳪ सकामउपनम ॥१४७॥

ति। येनकामेनयजंते। सोत्रंजुहोति। अमावास्यायैस्वाहाकामायस्वाहागत्यै

स्वाहेति ॥ १५ ॥ चंद्रमावाअंकामयत । अहोरात्रानर्धमासान्मासानृतून्त्सं
वत्सरमाप्त्वा । चंद्रमसः सायुज्यꣳसलोकतामाप्नुयामिति । सएतंचंद्रमसेप्रती
दृश्यायैपुरोडाशंपंचदशकपालंनिरवपत् । ततोवैसोऽहोरात्रानर्धमासान्मासानृ
तून्संवत्सरमाप्त्वा । चंद्रमसः सायुज्यꣳसलोकतामाप्नोत् । अहोरात्रान्हवाअ
र्धमासान्मासानृतून्संवत्सरमाप्त्वा । चंद्रमसः सायुज्यं ꣳ सलोकतामाप्नोति ।
यएतेनहविषायजंते । यउचैनदेवंवेद । सोत्रंजुहोति । चंद्रमसेस्वाहाप्रतीदृश्यां
यैस्वाहा । अहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा । मासेभ्यः स्वाहर्तुभ्यः स्वाहा
संवत्सरायस्वाहेति ॥ १ ॥ अहोरात्रेवाअंकामयेताम् । अत्यहोरात्रेमुच्येवाहि ।
ननांवहोरात्रेआप्नुयातामिति । तेएतमहोरात्राभ्यांचरुंनिरवपताम् । द्वयानां

व्रीहीणां। शुक्लानांचकृष्णानांच। सुवात्योदुँग्धे। श्वेतायैचकृष्णायैच। ततोवैते
अत्यंहोरात्रेअमुच्येते। नैनेंअहोरात्रेआप्नुताम्। अतिहवाअहोरात्रेमुच्यते।
नैनंमहोरात्रेआप्नुतः। यएतेनंहविषायजंते। यउंचैनदेवंवेद। सोत्रंजुहोति।
अहेस्वाहारात्रियैस्वाहा। अतिमुक्त्यैस्वाहेति॥ २ ॥ उषावाअकामयत। प्रि
यादित्यस्यंसुभगास्यामिति। सैतमुषसेचरुंनिरवपत्। ततोवैसाप्रियादित्यस्य
सुभगाभवत्। प्रियोहवैसमानानां सुभगोभवति। यएतेनंहविषायजंते।
यउंचैनदेवंवेद। सोत्रंजुहोति। उषसेस्वाहाव्युष्ट्यैस्वाहा। व्यूषुष्यैस्वाहाव्यु
च्छंत्यैस्वाहा। व्युष्टायैस्वाहेति॥३॥अथैतस्मैनक्षत्रायचरुंनिर्वपति। यथात्वं
देवानामसि। एवमहंमनुष्याणांभूयासमिति। यथाहवाएतद्देवानाम्। एवंहं

वाएवमनुष्याणांभवति। यएतेनहविषायजंते। यउचैनदेवंवेद। सोत्रंजुहोति।
नक्षत्रायस्वाहोदेष्यतेस्वाहा। उद्यतेस्वाहोदितायस्वाहाहरसेस्वाहाभरसेस्वा
हा भ्राजसेस्वाहातेजसेस्वाहा। तपसेस्वाहाब्रह्मवर्चसायस्वाहेति ॥४॥ सूर्योवा
अकामयत। नक्षत्राणांप्रतिष्ठास्यामिति। सएतंसूर्यायनक्षत्रेभ्यश्चरुंनिरवपत्।
ततोवैसनक्षत्राणांप्रतिष्ठाभवत्। प्रतिष्ठाहवैसमानानांभवति। यएतेनहविषाय
जंते। यउचैनदेवंवेद। सोत्रंजुहोति। सूर्यायस्वाहानक्षत्रेभ्यःस्वाहा। प्रतिष्ठायै
स्वाहेति ॥ ५ ॥ अथैतमदित्यैचरुंनिर्वपति। इयंवाअदितिः। अस्यामेवप्रति
तिष्ठति। सोत्रंजुहोति। अदित्यैस्वाहाप्रतिष्ठायैस्वाहेति ॥ ६ ॥ अथैतंविष्णवे
चरुंनिर्वपति। यज्ञोवैविष्णुः। यज्ञएवांततःप्रतितिष्ठति। सोत्रंजुहोति। विष्णवे

स्वाहांयज्ञायस्वाहाप्रतिष्ठायैस्वाहेति ॥ ७ ॥ चन्द्रमाः पंचदशाहोरात्रेसप्तदशो
षाएकादशाथैतस्मैनक्षत्रायत्रयोदशःसूर्योदशाथैतमादित्यैपंचाथैतंविष्णवे षट्
सप्त ॥ ७ ॥ अग्निर्नऋध्यास्मनवोनवोग्निर्मित्रश्चंद्रमाः षट् ॥८॥ अग्निर्नुस्तन्नो
वायुरहिर्बुध्नियंऋक्षावाइयमथैतत्पौर्णमास्याअजोवाएकपात्सूर्योवैत्रिषाष्टिः ७।
कर्मणेवांदेवेभ्यः शकेयमित्याहशक्त्यै । यज्ञस्यवैसंततिमनुप्रजाः पशवोयज
मानस्यसंतायंते । यज्ञस्यविच्छित्तिमनुप्रजाः पशवोयजमानस्यविच्छिद्यंते ।
यज्ञस्यसंततिरसियज्ञस्यत्वासंतत्यैस्तृणामिसंतत्यैत्वा यज्ञस्येत्याहवनीया
त्संतनोति । यजमानस्यप्रजायैपशूनांसंतत्यै । अपः प्रणयति । श्रद्धावा
आपः । श्रद्धामेवारभ्यप्रणीयप्रचरति । अपःप्रणयति । यज्ञोवाआपः ॥ १ ॥

॥१४९॥

यज्ञमेवारभ्यंप्रणीयप्रचंराति । अपःप्रणंयति । वज्रोवाआपंः । वज्रंमेवभ्रातृंव्ये
भ्यः प्रहृत्यंप्राणीयप्रचंराति । अपः प्रणंयति । आपोवैरंक्षोघ्नीः । रक्षंसामपं
हत्यै । अपःप्रणंयति । आपोवैदेवानांप्रियंधामं । देवनांमेवप्रियंधामंप्रणीय
प्रचंराति । अपः प्रणंयति । आपोवैसर्वांदेवताः । देवताएवारभ्यंप्रणीयप्रचं
राति ॥ २ ॥ आशिषंमेवैतामाशांस्तेपूर्णपात्रे । अंतुतोनुष्टुभा । चतुंष्पद्वा
एतच्छंदःप्रतिंष्ठितंपत्निंयैपूर्णपात्रेभवाति । अस्मिन्लोकेप्रतितिष्ठानीति ।
अस्मिन्नेवलोकेप्रतितिष्ठति । अथोवाग्वाअंनुष्टुक् । वाङ्मिंथुनम् । आपो
रेतः प्रजननंनम् । एतस्माद्वैमिथुनाद्विद्योतमानस्तुनयंन्वर्षति । रेतःसिंचन्॥ १॥
प्रजाः प्रजनयंन् । यद्वैयज्ञस्यब्रह्मणायुज्यते । ब्रह्मणावैतस्यंविमोकः । अद्भिः

शांतिः । विमुक्तंवाएतर्हियोक्नंब्रह्मणा । आदायैनत्पत्नीसहापउपंगृह्णीते
शांत्यै । अंजलौपूर्णपात्रमानंयति । रेतंएवास्यांप्रजांदधाति । प्रजयाहिम
नुष्यंःपूर्णः । मुखंविमृष्टे । अवभृथस्यैवरूपंकृत्वोत्तिष्ठति ॥२॥ ब्रह्मणेब्राह्मण
मालंभते । क्षत्रायंराजन्यम् । मरुद्भ्योवैश्यम् । तपंसेशूद्रम् । तमंसेतस्करम् ।
नारंकायवीरहणंम् । पाप्मनेक्लीबम् । आक्रयायांअयोगम् । कामांयपुंश्चलम् ।
अतिक्रुष्टायमागधम् ॥ १ ॥ प्रनोवाजांअभिद्यंवः । हविष्मंतोघृताच्या ।
देवांजिगातिसुम्नयुः । अग्नआयांहिवीतये । गृणानोहव्यदांतये । निहोतां
सत्सिबर्हिषि । तंत्वांसमिद्भिरंगिरः । घृतेनंवर्धयामसि । बृहच्छोचायविष्ठ्य ।
संनःपृथुःश्रवाय्यम् ॥ १ ॥ अच्छांदेवविवासासि । बृहदंग्नेसुवीर्यम् । ईडेन्योनम

स्यांस्तरः। तमांॅसिदश्रुतः। समुग्निरिध्यतेवृषां। वृषोंअग्निःसामिध्यते। अश्वो
नदेववाहनः। तॅहुविष्मंतईडते। वृषणंत्वावयंवृषन्। वृषाणःसामिधीमहि॥२॥
अग्नेदीद्यतंबृहत्। अग्निंदूतंवृणीमहे। होतांरंविश्ववेदसम्। अस्ययज्ञस्यंसुक्र
तुम्। समिध्यमांनोअध्वरे। अग्निःपांवकईड्यः। शोचिष्केशस्तमीमहे। सांमे
द्धोअग्नआहुत। देवान्यक्षिस्वध्वरे। त्वॅहिहव्यवाडासिं। आजुंहोतदुवस्यत।
अग्निंप्रयत्यध्वरे। वृणीध्वॅहव्यवाहनम्। त्वंवरुणउतमित्रोअंग्ने। त्वांवर्धतिम
तिभिर्वसिष्ठाः। त्वेवसुंसुषणनानिसंतु। यूयंपांत स्वस्तिभिः सदानः॥ ३ ॥
श्रवाय्यंमिधीमह्यसिंसमृत्तचं॥१॥ अंजन्तित्वामध्वरेदेवयंतः। वनस्पतेमधुनादै
व्येन। यदूर्ध्वस्तिष्ठाद्रविणेहधत्तात्। यद्वाक्षयोमातुरस्याउपस्थे। उच्छ्रयस्व

वनस्पते। वर्ष्मन्पृथिव्या अधि। सुमिती मीयमानः। वर्चोधा यज्ञवाहसे। समि
द्धस्य श्रयमाणः पुरस्तात्। ब्रह्मवन्वानो अजरꣳ सुवीरम्। आरे अस्मदमतिं बाध
मानः। उच्छ्रयस्व महते सौभगाय ॥१॥ युवा सुवासाः परिवीत आगात्। स उ
श्रेयान्भवति जायमानः। तं धीरासः कवय उन्नयन्ति। स्वाधियो मनसा देवयन्तः
॥१॥ इदं त एकं पर ऊत एकम्। तृतीयेन ज्योतिषा संविशस्व। संवेशनस्तनुवै चा
रुरेधि। प्रियो देवानां परमे जनित्र इति॥१॥ सैव ततः प्रायश्चित्तिः। अर्धो वा एतस्य
यज्ञस्य मीयते। यस्य व्रत्येऽहन्पत्न्यनालम्भुका भवति। तामपरुध्य यजेत। सर्वेणै
व यज्ञेन यजते। तामिष्ट्वोपह्वयेत। अमूहमस्मि। सा त्वम्। द्यौरहम्। पृथिवी त्वम्।
सामाहम्। ऋक्त्वम्। तावेहि सम्भवाव। सह रेतो दधावहै। पुꣳसे पुत्राय वेत्तवै। राय

स्पोषांयसुप्रजास्त्वायंसुवीर्यायेति । अर्धएवैनामुपंह्वयते । सैवतत्तुःप्रायश्चित्तिः ॥ १ ॥ याःपुरस्तात्प्रस्रवंति । उपरिष्टात्सर्वतश्चयाः । ताभीरश्मिपवित्राभिः । श्रद्धांयज्ञमारंभे । देवांगातुविदः । गातुंयज्ञायविंदत । मनंसस्पतिनादेवेन । वाताद्यज्ञःप्रयुज्यताम् । तृतीयस्यैदिवः । गायत्रियासोमआभृतः ॥ १ ॥ रुद्रेभ्योयज्ञंप्रब्रवीमि । इदमहंवरुणज्येष्ठेभ्यः । आदित्येभ्योयज्ञंप्रब्रवीमि । पयस्वतीरोषधयः । पयस्वद्वीरुधांपयः । अपांपयसोयत्पयः । तेनमामिंद्रसꣳसृज । अग्नेव्रतपतेव्रतंचरिष्यामि । तच्छकेयंतन्मेराध्यताम् । वायोव्रतपतआदित्यव्रतपते । व्रतानांव्रतपतेव्रतंचारिष्यामि । तच्छकेयंतन्मेराध्यताम् ॥ १ ॥ उलूखलेमुसलेयच्चशूर्पे । आशिश्लेषदृषदियत्कपाले । अवप्रुषोविप्रुषःसंयजामि । विश्वेदेवाहवि

मंत्र- ॥१५२॥

रिदंजुषन्ताम् । यज्ञेयाविप्रुषःसंतिबह्वीः। अग्नौताःसर्वाःस्विष्टाःसुहुताजुहोमि ।
उद्यंनद्यमित्रमहः। सपत्नांन्मेअनीनशः। दिवैनान्वितायुंताजहि । निम्रोचन्नध
रान्कृधि ॥१॥ उद्यंनद्यविनोंभज । पितापुत्रेभ्योयथा । दीर्घायुत्वस्यंहेशिषे ।
तस्यंनोदेहिसूर्य । उद्यंनद्यमित्रमहः। आरोहन्नुत्तरांदिवं। हृद्रोगंममंसूर्य ।हरि
माणंचनाशय। शुकेषुमेहरिमाणं। रोपणाकासुदध्मासि॥२॥अथोहारिद्रवेषुमे।
हरिमाणंनिदध्मसि । उदगादयमादित्यः । विश्वेनसहंसासह । द्विषंतंममरंध
यंन् । मोअहंद्विषतोरधं । योनःशपादशंपतः। यश्चंनःशपंतःशपात् । उषाश्चत
स्मैनिम्रक्चं ।सर्वंपापंसमूहतां॥३ योनःसपत्नोयोरणः। मर्तोभिदासांतिदेवाः।
इध्मस्यैवप्रक्षायंतः । मातस्योच्छेषिकिंचन । अवंसृष्टःपरापत ।शरोब्रह्मस॑

संग्रहः

शितः। गच्छामित्रान्प्रविंश। मैषांकंचुनोच्छिषः॥४॥ विश्वेदेवायजमानश्चसी
दत। एकमिषेविष्णुस्त्वान्वेतु॥१॥द्वेऊर्जेविष्णुस्त्वान्वेतु। त्रीणिव्रतायविष्णु
स्त्वान्वेतु। चत्वारिमायोभवायविष्णुस्त्वान्वेतु। पंचपशुभ्योविष्णुस्त्वान्वेतु।
षड्रायस्पोषायविष्णुस्त्वान्वेतु।सप्तसप्तभ्योहोत्राभ्योविष्णुस्त्वान्वेतु।सखायः।
सप्तपदाअभूम। सख्यंतेगमेयं।सख्यात्तेमायोषं।सख्यान्मेमायोष्ठाः॥२॥यद्वो
देवाअतिपादयानि। वाचाचित्प्रयतंदेवहेडनम्। अरायोअस्मा२अभिदुच्छुना
यते। अन्यत्रास्मन्मरुतस्तंनिधेतन।ततंमआपस्तदुतायतेपुनः।स्वादिष्ठाधीति
रुचथायशस्यते। अय२संमद्रउतविश्वभेषजः। स्वाहाकृतस्य समुतृप्णुतर्भुवः।
उद्वयंतमसस्परि। उदुत्यंचित्रं॥१॥आभिर्गीर्भिर्यदतोनऊनं। आप्यायययहरि

व्रतोवर्धमानः। यदास्तोतृभ्योमहिगोत्रारुजासि। भूयिष्ठभाजोअधतेस्याम। अनाज्ञातंयदाज्ञातम्। यज्ञस्यक्रियतेमिथु। अग्नेतदस्यकल्पय। त्वꣳहिवेत्थयथातथं। पुरुषसंमितोयज्ञः। यज्ञःपुरुषसंमितः। अग्नेतदस्यकल्पय। त्वꣳहिवेत्थयथातथं। यत्पाकत्रामनसादीनदक्षान। यज्ञस्यमन्वतेमर्तासः। अग्निष्टद्धोताक्रतुविद्विजानन्। यजिष्ठोदेवाꣳऋतुशोयजाति॥१॥ यद्देवादेवहेडनम्। देवासश्चकृमावयम्। आदित्यास्तस्मान्मामुंचत। ऋतस्यर्तेनमामुतदेवाजीवनकाम्यायत्। वाचानृतमूदिम। अग्निर्मातस्मादेनसः। गार्हपत्यःप्रमुंचतु। दुरितायानिचकृम। करोतुमामनेनसं॥१॥ ऋतेनद्यावापृथिवी। ऋतेनत्वꣳसरस्वति। ऋतान्मामुंचताꣳहसः। यदन्यकृतमारिम। सजातशꣳसादुतजावामिशꣳसात्। ज्यायसः

शꣳसादुतवाकनीयसः । अनाज्ञातंदेवकृतंयदेनः । तस्मात्त्वमस्मान्जातवेदोमु
मुग्धि । यद्वाचायन्मनसाबाहुभ्यामूरुभ्यामष्ठीवद्भ्यां ॥२॥ शिश्नैर्यदनृतंचकृ
मावयं । अग्निर्मातस्मादेनसः । यद्धस्ताभ्यांचकरकिल्बिषाणि । अक्षाणांवग्नुमु
पजिघ्नमानः । दूरेपश्याचराष्ट्रभृच्च । तान्यप्सरसावनुदत्तामृणानि । अदीव्यन्नृणं
यदहंचकार । यद्वादास्यन्त्संजगाराजनेभ्यः । अग्निर्मातस्मादेनसः । यन्मयि
मातागर्भेसति ॥३॥ एनश्चकारयत्पिता । अग्निर्मातस्मादेनसः । यदापिपेषमा
तरंपितरं । पुत्रःप्रमुदितोधयन् । अहिꣳसितौपितरौमयातत् । तदग्नेअनृणोभ
वामि । यदन्तरिक्षंपृथिवीमुतद्यां । यन्मातरंपितरंवाजिहिꣳसिम । अग्निर्मातस्मा
देनसः । यदाशसानिशसायत्पराशसा ॥४॥ यदेनश्चकृमानूतनंयत्पुराणम् । अ

ग्निमु॑तस्मा॒देन॑सः। अति॑क्रामामिदु॒रि॒तं॑यदेनः। जहा॑मिरि॒प्रंप॑र॒मेस॒धस्थे॑। यत्र॒यं
ति॑सु॒कृतो॒नापि॑दु॒ष्कृतः। तमारो॑हामिसु॒कृतां॒नु॒लो॒कम्। त्रि॒ते॒दे॒वा अ॑मृजतै॒तदेनः।
त्रि॒तए॒तन्म॑नु॒ष्ये॑षुमामृजे। ततो॑मा॒यदि॑किंचि॒दान॒शे। अ॒ग्निमा॑तस्मा॒देन॑सः॥५॥
गार्ह॑पत्यः॒प्रमुं॑चतु। दु॒रि॒ताया॑निचकृम। क॒रोतु॒मामं॑ने॒नस॑म्। दि॒विजा॒ता अ॒प्सु
जा॒ताः। याजा॒ता ओष॑धीभ्यः। अथो॒या अ॒ग्नि॒जा आपः॑। तानः॑शुं॒धं॒तु॒शुं॒धनीः।
यदा॒पोन॒क्तं॑दु॒रि॒तं॑च॒राम॑। यद्वा॒दिवा॒नूत॒नं॑यत्पु॒रा॒णम्। हिर॑ण्यवर्णा॒स्तत॒उत्पु॒नी
तनः। इमम्मे॑वरुण॒तत्वा॑यामि। त्वन्नो॑अग्ने॒सत्वन्नो॑अग्ने। त्वम॑ग्ने॒अयासि॥६॥अ॒ग्ने
नस॑मंष्टी॒वद्ध्यां॒सा॒तिप॑रा॒श॒सा॒नंशौ॑ग्निमा॑तस्मा॒देन॑सः॒पु॒नीत॒नस्त्रीणि॑च ॥१॥ अ॒
भिनः॑शी॒यता॒र॒यिः। सचं॑तां॒नः॒श॒ची॒पतिः। परं॑मृत्यो॒अनु॒परे॑हि॒पंथा॑म्। यस्ते॒

स्वइतरोदेवयानात् । चक्षुष्मतेशृण्वतेतेंब्रवीमि । मानःप्रजाꣳरीरिषोमोतवी
रान् । इदमनुःश्रेयोवसानमागन्म । यद्गोजिद्धनजिदश्वजिद्यत् । पुर्णवनस्पते
रिव । अभिनःशीयताꣳरयिः । सचंतांनःशचीपतिः॥ १॥सांग्रहण्येष्ट्यायजते।
इमांजनताꣳसंगृह्णानीति । द्वादशारत्नीरशनाभवति। द्वादशमासाःसंवत्सरः।
संवत्सरमेवावरुंधे । मौञ्जीभवति। ऊर्ग्वैमुञ्जाः । ऊर्जमेवावरुन्धे । चित्रानक्षत्रं
भवति। चित्रंवाएतत्कर्म ॥१॥ यदश्वमेधःसमृध्यै । पुण्यंनामदेवयजनमध्यव
स्यति । पुण्यामेवतेनकीर्तिमभिजयति । अपदातीनृत्विजःसमावहंत्यासुब्रह्म
ण्यायाः। सुवर्गस्यलोकस्यसमष्ट्यै। केशश्मश्रुवपते। नखानिनिकृंतते । दतो
धावते। स्नाति। अहतंवासःपरिधत्ते । पाप्मनोपहत्यै। वाचंयत्वापवसति। सुव

गँस्यंल्लोकस्यगुप्त्यै । रात्रिंजागरयंतआसते । सुवर्गस्यंल्लोकस्यसमंष्ट्यै॥२॥
कर्मँधत्तेपंचंच॥१॥अनेनाश्वेनमेध्येनेष्ट्वा । अयꣳराजासर्वमायुरेत्विति । आयु
र्वाउद्गाता । आयुःक्षत्तसंग्रहीतारः । आयुरेवास्मिन्नायुर्दधाति । शतꣳशतंभ
वंति । शतायुःपुरुषःशतेंद्रियः । आयुष्येवेंद्रियेप्रतितिष्ठति । चतुःशताभंवंति ।
चतंस्रोदिशः॥ दिक्ष्वेवप्रतितिष्ठति॥१॥योदीक्षामंतिरेचयंति । सप्ताहंप्रचंरंति ।
सप्तवैशीर्षण्याःप्राणाः। प्राणादीक्षा । प्राणैरेवप्राणांदीक्षामवंरुंधे । पूर्णाहुतिमुत्त
मांजुंहोति । सर्वंवैपूर्णाहुतिः। सर्वमेवाप्नोति । अथोइयंवैपूर्णाहुतिः। अस्यामेव
प्रतितिष्ठति॥१॥पूर्णाहुतिमुत्तमांजुंहोति । प्रत्युत्तंब्ध्यैसयुत्वाय ॥१॥ आब्रह्म
न्ब्राह्मणोब्रह्मवर्चसीजायतामित्याह । ब्राह्मणएवब्रह्मवर्चसंदंधाति । तस्मात्पु

राब्राह्मणोब्रह्मवर्चसीजायताम् । आस्मिन्राष्ट्रेराजन्यइषव्यःशूरोमहारथोजायताम्
मित्याह । राजन्यएवशौर्यंमहिमानंदधाति । तस्मात्पुराराजन्यइषव्यः शूरो
महारथोजायत । दोग्ध्रीधेनुरित्याह । धेन्वामेवपयोदधाति । तस्मात्पुरादोग्ध्री
धेनुरजायत । वोढानड्वानित्याह ॥ १ ॥ अनडुह्येववीर्यंदधाति । तस्मात्पुरावोढा
नड्वानजायत । आशुःसप्तिरित्याह । अश्वएवजवंदधाति । तस्मात्पुराशुरश्वो
जायत । पुरंधिर्योषेत्याह । योषित्येवरूपंदधाति । तस्मात्स्त्रीयुवतिःप्रियाभा
वुका । जिष्णूरथेष्ठाइत्याह । आहवैतत्रजिष्णूरथेष्ठाजायते ॥ २ ॥ यत्रैतेनयज्ञेन
यजंते । सभेयोयुवेत्याह । योवैपूर्ववयसी । ससभेयोयुवा । तस्माद्युवापुमान्प्रि
योभावुकः । आस्ययजमानस्यवीरोजायतामित्याह । आहवैतत्रयजमानस्यवी

 रोजायते । यत्रैतेनयज्ञेनयजंतेनिकामेनिकामेनःपर्जन्योवर्षत्वित्याह । निका
 मेनिकामेहवैतत्रंपर्जन्योवर्षति।यत्रैतेनयज्ञेनयजंते। फलिन्योनओषधयःपच्यं
तामित्याह । फलिन्योहवैतत्रौषधयःपच्यंते।यत्रैतेनयज्ञेनयजंते । योगक्षेमोनः
कल्पतामित्याह । कल्पतेहवैतत्रंप्रजाभ्योयोगक्षेमः। यत्रैतेनयज्ञेनयजंते॥ ३॥
अनड्वानित्याहजायतेवर्षतिसप्तच। सर्वेषुवाएषुलोकेषुमृत्यवोन्वायत्ताः। तेभ्यो
यदाहुतीनंजुहुयात् । लोकेलोकएनंमृत्युर्विन्देत्। मृत्यवेस्वाहामृत्यवेस्वाहेत्य
भिपूर्वमाहुतीर्जुहोति।लोकाल्लोकादेवमृत्युमवयजते।नैनंलोकेलोकेमृत्युर्विंदति।
यदमुष्मैस्वाहामुष्मैस्वाहेतिजुहुयात्संचक्षीत । बहुंमृत्युममित्रंकुर्वीत ।मृत्यवेस्वा
हेत्येकंस्माएवैकांजुहुयात्। एकोवाअमुष्मिन्लोकेमृत्युः।१।अशनयामृत्युरेव।

तमेवामुष्मिँल्लोकेऽवयजते । भ्रूणहत्यायैस्वाहेत्यवभृथआहुतिंजुहोति । भ्रूणह
त्यामेवावयजते । तदाहुः । यद्भ्रूणहत्यापाऽत्र्याथ । कस्माद्यज्ञोपिक्रियतइति ।
अमृत्युर्वाअन्योभ्रूणहत्याया इत्याहुः। भ्रूणहत्यावावमृत्युरिति । यद्भ्रूणहत्या
यैस्वाहेत्यवभृथआहुतिंजुहोति ॥२॥ मृत्युमेवाहुत्यातर्पयित्वापरिपाणंकृत्वा ।
भ्रूणघ्नेभेषजंकरोति । एताꣳहवैमुण्डिभऔदन्यवः। भ्रूणहत्यायैप्रायश्चित्तिंविदां
चकार । योह्यस्यापिप्रजायांब्राह्मणꣳहन्ति । सर्वस्मैतस्मैभेषजंकरोति। जुंबु
कायस्वाहेत्यवभृथउत्तमामाहुतिंजुहोति । वरुणोवैजुंबुकः। अन्ततएववरुणमव
यजते । खलतेर्विक्लिधस्यशुक्लस्यपिङ्गाक्षस्यमूर्धञ्जुहोति । एतद्वैवरुणस्यरूपं ।
रूपेणैववरुणमवयजते॥३॥ लोकेमृत्युर्जुहोविमूर्धञ्जुहोतिद्वेच॥ भूरग्निंचपृथिवीं
चमांच । त्रीꣳश्चलोकान्त्संवत्सरंच। प्रजापतिस्त्वासादयतु । तयादेवतयाङ्गि

रुस्वध्रुवासींद । भुवावौयुंचांतरिंक्षंचुमांचं । त्रीᳫंश्चलोकान्तसंवत्सुरंचं । प्रजापं
तिस्त्वासादयतु। तयांदेवतंयांगिरस्वध्रुवासींद । स्वंरादित्यंच्चुदिवंचुमांचं ।त्रीᳫं
श्चंलोकान्तसंवत्सुरंचं । प्रजापंतिस्त्वासादयतु। तयांदेवतंयांगिरस्वध्रुवासींद ।
भूर्भुवः स्वंश्चंद्रमंसंचुदिशंश्चुमांचं । त्रीᳫंश्चलोकान्तसंवत्सुरंच । प्रजापंतिस्त्वा
सादयतु । तयांदेवतंयांगिरस्वध्रुवासींद ॥ १ ॥ संवत्सुरंचुषट्चं ॥१॥ भूर्भुवः
स्वंः। ओजोबलं। ब्रह्मंक्षत्रं । यशोंमुहत्। सत्यंतपोनामं। रूपममृतं। चक्षुःश्रोत्रं।
मनआयुः । विश्वंयशोंमुहः । समंतपोहरोभाः । जातवेदायदिवापावुकोसि । वै
श्वानरोयदिवावैद्युतोसि । शंप्रजाभ्योयजंमानायलोकम् । ऊर्जंपुष्टिंददंदभ्याव
वृत्स्व ॥१॥ भाश्चंत्वारिंच ॥१॥ विपश्चितेपवंमानायगायत । मुहीनधारात्यंधो
अर्षति । अहिर्हजीर्णामतिंसर्पतित्वचंम् । अत्योनक्रीडंन्नसरद्वृषाहरिः। उपया

मगृंहीतोमिमृत्यवेंत्वाजुष्टंगृह्णामि । एषतेयोनिर्मृत्यवेंत्वा । अपंमृत्युमपक्षुधं ।
अपेतः शपथंजहि । अधांनोअग्नआवंह । रायस्पोषंँसहस्रिणं ॥ १ ॥ येतेंसहस्रं
मयुतंपाशाः । मृत्योमर्त्यांयुहंतंवे । तान्यज्ञस्यंमायया । सर्वानवंयजामहे । भक्षो
स्यमृतभक्षः । तस्यंतेमृत्युपींतस्यामृतंवतः । स्वगाकृंतस्यमधुंमतः । उपंहूत
स्योपंहूतोभक्षयामि । मंद्राभिभूंतिः केतुर्यज्ञानांवाक् । असावेंहि ॥ २ ॥ अंधो
जागृविःप्राण । असावेंहि । बधिरआक्रंदइतरपान । असावेंहि । अहोस्तोस्त्वा
चक्षुः । असावेंहि । अपादाशोमनः । असावेंहि । कवेविप्रंचित्तेश्रोत्रं । असावेंहि
॥ ३ ॥ सुहस्तःसुंवासाः । शूषोनामांस्यमृतोमर्त्येषु । तत्वाहंतथावेंद । असावेंहि ।
अग्निर्मेवाचिश्रितः । वाग्घृदंये । हृदंयंमयि । अहममृतें । अमृतंब्रह्मणि । वायुर्मे
प्राणेश्रितः ॥ ४ ॥ प्राणोहृदंये । हृदंयंमयि । अहममृतें । अमृतंब्रह्मणि । सूर्यांमे

चक्षुंषिश्रितः। चक्षुर्हृदये।हृदयंमयि। अहममृते। अमृतंब्रह्मणि। चंद्रमामेमनं
सिश्रितः॥५॥मनोहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। दिशोमेश्रोत्रे
श्रिताः। श्रोत्रꣳहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। आपोमेरेतसि
श्रिताः॥६॥रेतोहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। पृथिवीमेशरीरे
श्रिता। शरीरꣳहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। ओषधिवनस्प
तयोमेलोमसुश्रिताः॥७॥ लोमानिहृदये। हृदयंमयि। अहममृते। अमृतं
ब्रह्मणि। इंद्रोमेबलेश्रितः। बलꣳहृदयेहृदयंमयि। अहममृते। अमृतंब्रह्मणि।
पर्जन्योमेमूर्ध्निश्रितः॥८॥ मूर्धाहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि।
ईशानोमेमन्यौश्रितः। मन्युर्हृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि।
आत्मामेआत्मनिश्रितः। आत्माहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि।

पुनर्मेआत्मापुनरायुरागात् । पुनः प्राणः पुनराकूतमागात् । वैश्वानरोरश्मिभिर्
वावृधानः । अंतस्तिष्ठत्वमृतस्यगोपाः ॥९॥ सहस्रिणंमिहिश्रोत्रासावेहिप्राणे
श्रितोमनसिश्रितोरेतसिश्रितालोमसुश्रितामूर्ध्निश्रितआत्मनिश्रितोष्ठौच॥१॥ त्व
मग्नेरुद्रोअसुरोमहोदिवः।त्वꣳशर्द्धोमारुतंपृक्षईशिषे। त्वंवातैररुणैर्यासिशंगयः।
त्वंपूषाविधतःपासिनुत्मना । देवादेवेषुश्रयध्वम् । प्रथमाद्वितीयेषुश्रयध्वम् ।
द्वितीयास्तृतीयेषुश्रयध्वम् । तृतीयाश्चतुर्थेषुश्रयध्वम् । चतुर्थाःपंचमेषुश्रय
ध्वम्। पंचमाःषष्ठेषुश्रयध्वम् ॥१॥ षष्ठाःसप्तमेषुश्रयध्वम् । सप्तमाअष्टमेषुश्र
यध्वम् । अष्टमानवमेषुश्रयध्वम् । नवमादशमेषुश्रयध्वम् । दशमाएकादशे
षुश्रयध्वम् । एकादशाद्वादशेषुश्रयध्वम् । द्वादशास्त्रयोदशेषुश्रयध्वम् । त्रयो
दशाश्चतुर्दशेषुश्रयध्वम् । चतुर्दशाःपंचदशेषुश्रयध्वम् । पंचदशाःषोडशेषुश्र

यध्वम् ॥२॥ षोडशाःसंप्तदशेषुंश्रयध्वम् । सप्तदशा अंष्टादशेषुंश्रयध्वम् । अ
ष्टादशा एंकान्नविꣳशेषुंश्रयध्वम् । एकान्नविꣳशा विꣳशेषुंश्रयध्वम्।विꣳशा एंक
विꣳशेषुंश्रयध्वम् । एकविꣳशां द्वाविꣳशेषुंश्रयध्वम् । द्वाविꣳशास्त्रंयोविꣳशेषुं
श्रयध्वम् । त्रयोविꣳशाश्चंतुर्विꣳशेषुंश्रयध्वम्। चतुर्विꣳशाःपंचविꣳशेषुंश्रय
ध्वम्। पंचविꣳशाःषड्विꣳशेषुंश्रयध्वम् ॥३॥ षड्विꣳशाःसंप्तविꣳशेषुंश्रयध्वम् ।
सप्तविꣳशा अंष्टाविꣳशेषुंश्रयध्वम् । अष्टाविꣳशा एंकान्नत्रिꣳशेषुंश्रयध्वम् ।
एकान्नत्रिꣳशास्त्रिꣳशेषुंश्रयध्वम् । त्रिꣳशा एंकत्रिꣳशेषुंश्रयध्वम् । एकत्रिꣳशा
द्वांत्रिꣳशेषुंश्रयध्वम् । द्वात्रिꣳशास्त्रंयस्त्रिꣳशेषुंश्रयध्वम् । देवांस्त्रिरेकादशास्त्र
स्त्रंयस्त्रिꣳशाः । उत्तरेभवत उत्तरवर्त्मान उत्तरसत्वानः । यत्काम इदंजुहोमि ।
तन्मेसमृध्यताम् । वयꣳस्याम पतयोरयीणाम् । भूर्भुवःस्वःस्वाहा ॥ ४ ॥

षष्ठेषु श्रयध्वᳬ षोडशेषुं श्रयध्व ᳬ षड्विᳬशेषुं श्रयध्वमुत्तरे भवतोत्तरवत्मानंउत्त
रसत्वानश्चत्वारिंच ॥ १ ॥ अन्नंपतेन्नस्यनोदेहि । अनमीवस्यंशुष्मिणः । प्रप्रं
दातारंतारिषः । ऊर्जन्नोधेहिद्विपदेचतुष्पदे । अग्नेपृथिवीपते । सोमंवीरुधांपते ।
त्वष्टः समिधांपते ।विष्णवाशानांपते । मित्रंसत्यानांपते । वरुणधर्मणांपते॥ १॥
संकुलपजूतिंदेवंविपाश्चं । मनोराजानमिहवर्धयंतः । उपहवेस्यसुमतौस्यांम ।
चरणंपवित्रंविततंपुराणं । येनंपूतस्तरंतिदुष्कृतानि । तेनपवित्रेणशुद्धेनंपूताः ।
अतिपाप्मानमरांतिंतरेम। लोकस्यद्वारमार्चिमत्पवित्रं । ज्योतिष्मद्भ्राजमानं
महस्वत् । अमृतस्यधाराबहुधादोहमानं । चरणंनोलोकेसुधितांदधातु । अग्नि
र्मूर्धाभुवः । अनुनोद्यानुमतिरन्विदंनुमतेत्वं । हव्यवाहᳬस्विष्टं ॥ १॥ एतैरायु
ष्कामः । प्रजापशुकामोवा । पुरस्तादशंहोतारमुदंचमुपदधातियावत्पदं । हद

यंयजुंषीपत्न्यौच । दक्षिणतःप्रांचुंचतुर्होतारं।पुश्चादुदंचुंपंचहोतारम् । उत्तरतः
प्रांचु ँ षड्ढोतारम्। उपरिष्टात्प्रांचं ँ सप्तहोतारं । हृदयंयंयजूं ँ षिपत्न्यंश्च । यथा
वकाशंग्रहान् । यथावकाशंप्रतिग्रहान्लोकंपृणाश्च । सर्वाहास्यैतादेवताः प्रीता
अभीष्टांभवंति॥ १॥ऋचांप्राचीमहतीदिगुच्यते। दक्षिणामाहुर्यजुंषामपाराम् ।
अथर्वणामंगिरसांप्रतीचीं । साम्नामुदीचीमहतीदिगुच्यत्ते । ऋग्भिः पूर्वाह्णे
दिविदेवईयते । यजुर्वेदेतिष्ठतिमध्येअह्नः । सामवेदेनास्तमयेमहीयते । वेदै
रशून्यस्त्रिभिरेतिसूर्यः । ऋग्भ्योजाता ँ सर्वशोमूर्तिमाहुः। सर्वागतिर्याजुषीहैव
शश्वत् ॥ १ ॥ सर्वतेजःसामरूप्य ँ हशश्वत् । सर्व ँ हेदंब्रह्मणाहैवसृष्टम्
ऋग्भ्योजातंवैश्यंवर्णमाहुः । यजुर्वेदंक्षत्रियस्याहुर्योनिं । सामवेदोब्राह्मणानां ॥१६०॥
प्रसूतिः । पूर्वेपूर्वेभ्योवचएतदूचुः । आदर्शमग्निंचिन्वानाः । पूर्वेविश्वसृजोमृ

तां। शतंवर्षसहस्राणि। दीक्षिताः सत्रमासत ॥ २ ॥ तपंआसीद्गृहपतिः।
ब्रह्मब्रह्माभवत्स्वयं। सत्य ँहहोतैषामासीत्। यद्विश्वसृजआसंत। अमृतमे
भ्युदगायत्। सहस्रंपरिवत्सरान्। भूत ँ हप्रस्तोतैषामासीत्। भविष्यत्प्र
तिचाहरत्। प्राणोअध्वर्युरभवत्। इद ँ सर्व ँसिषासतां॥ ३॥अपानोविद्वा
नावृतः। प्रतिप्रातिष्ठदध्वरे। आर्तवाउपगातारः। सदस्याऋतवोभवन्।
अर्धमासाश्चमासाश्च। चमसाध्वर्यवोभवन्। अशं ँसब्रह्मणस्तेजः। अच्छा
वाकोभवद्यशः। ऋतमेषांप्रशास्तासीत्। यद्विश्वसृजआसंत ॥ ४ ॥ ऊर्ग्रा
जानमुदवहत्। ध्रुवगोपः सहोभवत्। ओजोभ्यष्टौद्ग्राव्णः। यद्विश्वसृजआ
संत। अपचितिः पोत्रीयामयजत्। नेष्ट्रीयामयजात्त्विषिः। आग्नीध्राद्विदुषी
सत्यं। श्रद्धाहैवायजत्स्वयम्। इरापत्नीविश्वसृजां। आकूतिरापिनद्धविः॥५॥

इध्म ꣳ हस्रुच्चैभ्यतुग्रे । तृष्णाचावहतामुभे । वागेषा ꣳ सुब्रह्मण्यासीत् ।
छंदांयोगान्विजानती । कल्पतंत्राणितन्वानाहः । स ꣳ स्थाश्चंसर्वशः । अहो
 रात्रेपशुपाल्यौ । मुहूर्ताःप्रेष्याअभवन् । मृत्युस्तदंभवद्धाता । शमितोग्रो
विशांपतिः ॥ ६ ॥ विश्वसृजः प्रथमाः सत्रमासत । सहस्रंसमंप्रसुतेनयंतः ।
ततोहजज्ञेभुवनस्यगोपाः । हिरण्मयः शकुनिर्ब्रह्मनाम । येनसूर्यस्तपतितेज
सेद्धः । पितापुत्रेणपितृमान्योनियोनौ । नावेदविन्मनुतेतंबृहंतं । सर्वानुभुमा
त्मानं ꣳ संपराये । एषनित्योमहिमाब्राह्मणस्य । नकर्मणावर्धतेनोकनीयान् ।
॥ ७ ॥ तस्यैवात्मापदवित्तंविदित्वा । नकर्मणालिप्यतेपापकेन । पंचपंचा
शतःस्त्रिवृतः संवत्सराः । पंचपंचाशतःपंचदशाः । पंचपंचाशतः सप्तदशाः ।
पंचपंचाशतएकवि ꣳ शाः । विश्वसृजां ꣳ सहस्रंसंवत्सरं । एतेनवैविश्वसृज

इदंविश्वममसृजंत । यद्विश्वममसृजंत । तस्माद्विश्वसृजः । विश्वमेनाननुप्रजायते
ब्रह्मणःसायुज्यꣳसलोकतांयंति । एतासामेवदेवतानाꣳसायुज्यं । सार्ष्टितां ꣳ
समानलोकतांयंति । यएतदुपयंति । येचैनत्प्राहुः । येभ्यश्चैनत्प्राहुः ॥ ९ ॥
शश्वंदासतासिषांसतामासंतद्धविः पतिः कनीयांतस्माद्विश्वसृजोष्टौच ॥ १ ॥

इति संहिता-आरण-ब्राह्मणमंत्रसंग्रहः समाप्तः ।

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मज–गंगाविष्णुना स्वकीये "लक्ष्मीवेंकटेश्वर" मुद्रणालये मुद्रयित्वा प्रकाशितम्.

संवत् १९८५, शके १८५०.

पुस्तक मिलनेका ठिकाना–

गङ्गाविष्णु श्रीकृष्णदास, " लक्ष्मीवेंकटेश्वर " स्टीम प्रेस, कल्याण.

खेमराज श्रीकृष्णदास, " श्रीवेंकटेश्वर " स्टीम प्रेस, मुंबई.

इति श्रीहिरण्यकेशी-याज्ञिकोपयोगी

मन्त्रसंग्रहः समाप्तः ।

शोध संस्थान
सम्पादकीय
विभाग
कुंज, हरिद्वार